1945

ACC NO 8336
M126

॥ श्रीः ॥

सिद्धान्तसिद्धाञ्जनम्

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः

श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः
विरचितम् ।

विद्वद्वरैः परिशोध्य

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतम् ॥

१८९९

मूल्यं रू. १—०—०

(*All Rights Reserved*)

(*Registered according to Act* XXV *of* 1867.)

॥ श्रीः ॥

सिद्धान्तसिद्धाञ्जनम्

SRI SRIMARAJENDRA SANSKRIT COLLEGE
वाणी भजत गैर्वाणीं
LIBRARY
FORT, BANGALORE.

श्रीयादवाद्रिनिलयं श्रितकल्पवृक्षं
नारायणं निखिललोकनिदानभूतम्।
निस्सीमनिर्मलगुणं निरवद्यरूपं
नित्यं नमामि शिरसा सकलार्थसिद्ध्यै ॥

जयन्तु श्रीमन्तः श्रुतिशिखरसारस्यमधुराः
सुधासध्रीचीनाः कुटिलमतकोलाहलमुषः।
स्फुरद्युक्त्यासक्त्या द्रुहिणरमणाश्लाघ्यविभवाः
यतिक्ष्मोणीभर्तुर्निरुपमवचोगुम्भविसराः ॥

शेषार्यवंशाम्बुधिशीतरश्मिस्सुधीरनन्तार्य इति प्रतीतः।
सिद्धान्तसिद्धाञ्जननामधेयं प्रबन्धमेनं प्रकटीकरोति ॥

येऽर्था दुर्बोधतां प्राप्ता गम्भीराचार्यसूक्तिषु।
तादृशार्थप्रकटनात्सफलोऽयं श्रमो मम ॥

चिदचिदीश्वरतत्त्वज्ञानसहकृतभगवदुपासनस्य मोक्षहेतुतया तादृशतत्त्वज्ञानार्थं प्रमेयं निरूप्यते ॥

ज्ञेयत्वं प्रमेयसामान्यलक्षणम्। ज्ञेयत्वं च विषयतासम्बन्धेन ज्ञानमेव; तेन विषयत्वमात्रस्यैव लक्षणत्वसम्भवात्तत्र ज्ञाननिरूपितत्वं व्यर्थमिति शङ्काऽनवकाशः॥ यद्यपि—सिद्धान्ते ज्ञानस्य द्रव्यतया विष-

यतायाश्च संयोगरूपतया संयोगेन ज्ञानवत्त्वं लक्षणं पर्यवसन्नमित्यद्रव्येऽव्याप्तिः। तथाऽपि–संयोगसंयुक्तापृथक्सिद्ध्योर्द्वयोरेव विषयतात्वस्य वक्ष्यमाणतया अद्रव्ये संयुक्तापृथक्सिद्धिरूपविषयतासम्बन्धेन ज्ञानस्य सत्त्वान्नाव्याप्तिः ॥

तच्च प्रमेयं द्विविधं–द्रव्याद्रव्यभेदात्। तत्रावस्थावत्त्वं द्रव्यलक्षणं, तदन्यत्वं चाद्रव्यलक्षणं बोध्यम्। ईश्वरादावपि 'नित्यं विभुं सर्वगतं सुसूक्ष्मम्'–इत्यादिश्रुत्या सर्वसंयुक्तत्वरूपसर्वगतत्वप्रतिपादनेनानवरतपरिस्पन्दमानाणुसंयोगरूपावस्थावत्त्वस्य सत्त्वान्नाव्याप्तिः; आगन्तुकापृथक्सिद्धधर्मस्यैवावस्थाशब्दार्थत्वात्। न चैवं–निर्विकारत्वश्रुतिविरोधः, स्वभिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेन परिमाणविशिष्टपरिमाणरूपस्य सङ्कोचविकासादिरूपावस्थाद्वयवत्त्वस्यैव निर्विकारत्वश्रुतिघटकविकारशब्दार्थत्वेनाविरोधात् ॥ अत एव–**न च पर्यायादप्यविरोधो विकारादिभ्यः**–इति सूत्रे सङ्कोचविकासवत्त्वरूपावस्थाद्वयाङ्गीकार एव विकारित्वमापादितं, न तु शरीरसंयोगादिरूपावस्थावत्त्व इति स्फुटीभविष्यतिचेदमुपरिष्टात् ॥

द्रव्यं द्विविधं–जडमजडं चेति। जडत्वं चास्वप्रकाशत्वं, स्वनिरूपितविषयतावत्त्वतादात्म्योभयसम्बन्धेन किञ्चिद्विशिष्टान्यत्वम्। उक्तोभयसम्बन्धेन किञ्चिद्विशिष्टत्वरूपस्वप्रकाशत्वं चाजडत्वम्। तत्र जडं प्रकृतिकालभेदाद्विविधम्, अजडं तु जीवेश्वरनित्यविभूतिधर्मभूतज्ञानभेदाच्चतुर्विधमिति–द्रव्याणि षट् ॥

ननु–तत्तद्विषयकव्यवहारनिर्वाहार्थं तत्तद्विषयकज्ञानस्य स्वीकर्तव्यतया ज्ञानगोचरव्यवहारस्य ज्ञानान्तरेण निर्वाहे चानवस्थापत्त्या धर्मभूतज्ञानस्य स्वप्रकाशत्वाङ्गीकारस्य युक्तत्वेऽपि जीवादीनां स्वप्रकाशत्वमयुक्तम्। तथा हि–जीवानां स्वस्वगोचरव्यवहारस्य स्वविषयकस्वापृथक्सिद्धसाक्षात्काररूपधर्मभूतज्ञानेनैव निर्वाहात् जीवान्तर-

विषयकव्यवहारस्य च तद्विषयकप्रवृत्त्यादिलिङ्गकानुमित्यादिरूपज्ञानेनैव निर्वाहात्स्वप्रकाशत्वाङ्गीकारो व्यर्थः। तदङ्गीकारेऽपि जीवस्य स्वगोचरधर्मभूतज्ञानेन विना स्वव्यवहारानिर्वाहाच्च। स्वानुकूलकृतिमत्त्वसम्बन्धेन बुबोधयिषापूर्वकतत्तद्विषयकव्यवहारं प्रति तत्तद्विषयकज्ञानस्य अपृथक्सिद्धिसम्बन्धेन हेतुत्वेन स्वस्य स्वविषयकत्वेऽप्यात्मन्यपृथक्सिद्धिसम्बन्धेन अभावेन तद्व्यवहारहेतुत्वासम्भवात् । शुकादिव्यवहारे व्यभिचारवारणाय बुबोधयिषापूर्वकेति। एवमीश्वरगोचरास्मदादिकर्तृकव्यवहारे शास्त्रादिजन्येश्वरज्ञानस्य हेतुतया ईश्वरकर्तृकस्वगोचरव्यवहारे तद्गतधर्मभूतज्ञानस्यैव हेतुत्वात्स्वप्रकाशत्वकल्पनमफलम्; स्वस्य स्वस्मिन्नपृथक्सिद्धिसम्बन्धेनाभावाच्च। एवं नित्यविभूतेरपि तत्कल्पनमफलं, नित्यमुक्तादिकर्तृकतद्गोचरव्यवहारस्य तदीयधर्मभूतज्ञानेनैव निर्वाहात्, बद्धकर्तृकव्यवहारस्य च शास्त्रजन्यज्ञानेन निर्वाहात्–इति चेन्न ॥ घटचाक्षुषादौ रूपादिशून्यस्यात्मनो भानासम्भवेन तद्दशायामपि स्वगोचरव्यवहारस्य अनुभवसिद्धस्य निर्वाहायात्मनस्स्वविषयकत्वस्य स्वानुकूलकृतिमत्त्वसम्बन्धेन तद्विषयकव्यवहारं प्रति तादात्म्यापृथक्सिद्ध्यन्यतरसम्बन्धेन कारणत्वस्य च कल्पनात् । अनुमितौ परामर्शविषयस्य शाब्दबोधे पदानुपस्थितस्य च भानासम्भवेन तद्दशायामपि तद्व्यवहारनिर्वाहार्थं स्वप्रकाशत्वावश्यकत्वात्। एवं सुखमहमस्वाप्समिति सुषुप्त्युत्तरकालीनप्रत्यभिज्ञानिर्वाहाय सुषुप्तिकाले आत्मानुभवस्य वक्तव्यतया तद्दशायां च धर्मभूतज्ञानस्य इतरविषयकत्वासम्भवेन स्वप्रकाशात्मकानुभवस्यैव तादृशप्रत्यभिज्ञाहेतुभूतसंस्कारजनकताया अङ्गीकार्यत्वात्, आत्मनः स्वप्रकाशत्वावश्यकत्वात्। समानविषयकसंस्कारं प्रति तादात्म्यापृथक्सिद्ध्यन्यतरसम्बन्धेन अनुभवस्य कारणत्वेन स्वरूपात्मकानुभवस्यापि संस्कारजनकतासम्भवात्। व्यवस्थापयिष्यते चेदग्रे ॥

ईश्वरनित्यविभूत्योश्च प्रमाणबलात्स्वप्रकाशत्वमङ्गीक्रियते। ईश्वरस्वरूपात्मकानुभवस्येश्वरकर्तृकव्यवहारे तादात्म्येन हेतुत्वसम्भवात्, नित्यविभूतेरपि नित्यमुक्तादिकर्तृके स्वगोचरव्यवहारे अपृथक्सिद्धिसम्बन्धेन हेतुतासम्भवात्, शरीरात्मना परिणतायास्तस्या नित्यमुक्तादिष्वपृथक्सिद्धिसम्बन्धेन सत्त्वात्। प्रपञ्चयिष्यते चेदं यथावसरमिति दिक्॥

एवं जीवेश्वरयोः प्रत्यक्त्वं नित्यविभूतिधर्मभूतज्ञानयोश्च परावक्त्वं साधारणधर्मः। तत्र प्रत्यक्त्वं स्वस्मै स्वेनावभासमानत्वम्॥

ननु–अत्र स्वस्मा इति चतुर्थ्यन्तार्थः स्वकर्तृकव्यवहारजनकतावच्छेदकत्वं यदि, तदा अहमेक इत्यादिस्वकर्तृकव्यवहारजनकतावच्छेदिकाया एकत्वप्रकारतानिरूपिताहन्त्वावच्छिन्नविशेष्यतायाः स्वनिरूपितायाः मानुषादिशरीरावच्छिन्नात्मनि सत्त्वेऽपि पश्वादिशरीरावच्छिन्नात्मन्यव्याप्तिः। यदि स्वनिष्ठसंशयप्रतिबन्धकतावच्छेदकत्वं, तदा असम्भवः; अहमेको न वेत्यादिसंशयं प्रत्यपृथक्सिद्धिसम्बन्धेन तत्समानाधिकरणनिश्चयस्यैव प्रतिबन्धकत्वात्। अपृथक्सिद्धितादात्म्यान्यतरसम्बन्धेन तत्समानाधिकरणनिश्चयस्य प्रतिबन्धकत्वाङ्गीकारेऽप्यसम्भवः; स्वनिष्ठस्य स्वविशेष्यकैकत्वादिसंशयस्याप्रसिद्धेः। स्वनिष्ठो यस्संशयानुत्पादः तत्प्रयोजकत्वं चतुर्थ्यन्तार्थ इत्यपि न युक्तम्, संशयानुत्पादस्य तादृशसंशयप्रागभावरूपस्य स्वनिष्ठत्वासम्भवात्, यत्र तादृशसंशयो जायते तत्रैव तत्प्रागभावाभ्युपगमात्–इति चेन्न॥ स्वकर्तृकव्यवहारजनकतावच्छेदकत्वस्य तदर्थत्वेऽपि पश्वाद्यवच्छिन्नात्मन्यव्याप्तयसम्भवात्, तादृशात्मन एव मनुष्यादिशरीरावच्छिन्नत्वसम्भवेन स्वकर्तृकव्यवहारप्रसिद्धेः। स्वनिष्ठसंशयाभावप्रयोजकत्वस्य तदर्थत्वेऽप्यदोषात्, संशयप्रागभावस्य स्वनिष्ठत्वासम्भवेऽपि तदत्यन्ताभावस्य तन्निष्ठत्वसम्भवात्॥ न चैवं–धर्मभूतज्ञानस्य

प्रत्यक्त्वापत्तिः, अधिकरणभेदेनाभावभेदानुपगमे तादृशज्ञाननिष्ठस्व-निरूपितविषयत्वस्यात्मनिष्ठसंशयाभावप्रयोजकस्य स्वनिष्ठसंशयाभा-वप्रयोजकत्वानपायात्—इति वाच्यम्। स्वनिष्ठसंशयाभावाधिकरणता-प्रयोजकत्वस्य निवेशात्, आधेयाभेदेऽपि अधिकरणभेदेन अधिकरण-ताया भेदात्, सिद्धान्ते अभावस्याधिकरणवृत्तिधर्मरूपत्वेनाधिकरण-भेदेन भेदाच्च । स्वसामानाधिकरण्यस्वप्रयोजकत्वोभयसम्बन्धेन संशयाभावविशिष्टस्वनिरूपितविषयतावत्त्वं प्रत्यक्त्वमिति निष्कर्षः। प्रथमस्वपदद्वयं संशयाभावपरम्। चरमस्वपदं च यत्र प्रत्यक्त्वं स्याप्यं तत्परम्॥ एतदन्यत्वे सति स्वप्रकाशत्वम् पराक्त्वमवसेयम्॥

अद्रव्यं तु दशधा—सत्त्वरजस्तमोरूपरसगन्धस्पर्शशब्दसंयोगशक्ति-भेदात्॥

द्रव्याद्रव्यभेदभिन्नं प्रमेयं स्थिरमेव, क्षणभङ्गे प्रमाणाभावात्। न च—जगत्क्षणिकं सत्त्वादित्यनुमानेन तत्सिद्धिरिति—वाच्यम्; क्षणिकत्वस्य स्वाधिकरणक्षणध्वंसाधिकरणक्षणवृत्तिध्वंसप्रतियोगित्व-रूपत्वे सिद्धसाधनस्यार्थान्तरस्य वा प्रसङ्गात्। स्ववृत्तित्वस्वभिन्नक्षणा-वृत्तित्वोभयसम्बन्धेन क्षणविशिष्टत्वरूपत्वे च साध्याप्रसिद्धिः, एक-क्षणमात्रवृत्तिवस्तुनोऽस्माभिरनङ्गीकारात्, क्षणोपाधेः क्रियारूपत्वे कालद्रव्यपरिणामरूपत्वेऽपि वा क्षणमात्रवृत्तित्वानभ्युपगमात्॥ न च—क्षेत्रस्थबीजादङ्कुरोत्पत्तिः कुमूलस्थबीजान्नेत्यङ्कुरजननसामर्थ्यासामर्थ्य-रूपविरुद्धधर्माध्यासेन तादृशबीजयोर्भेदसिद्धौ तत्रैव क्षणिकत्वरूप-साध्यप्रसिद्धिरिति—वाच्यम्। तावताप्यङ्कुरमकुर्वाणस्य कुमूलस्थबीजस्य क्षणिकत्वासिद्धेः, तादृशस्याङ्कुरजन्मपूर्वतृतीयक्षणपर्यन्तावस्थाने बाधकाभावात्॥ न च—अङ्कुरकारिबीजजननसमर्थात् तृतीयक्षणस्थबीजा त्तदसमर्थचतुर्थक्षणस्थबीजस्य भेदः, एवं तृतीयक्षणस्थबीजजननसमर्था-च्चतुर्थक्षणस्थबीजात्तदसमर्थपञ्चमक्षणस्थबीजस्य भेद इत्यादिरीत्या

कुसूलस्थबीजपर्यन्तं भेदसिद्ध्या क्षणिकत्वसिद्धिरिति–वाच्यम्। सामर्थ्यासामर्थ्यशब्देन स्वरूपयोग्यत्वतदभावयोर्विवक्षणे कुसूलस्थबीजे असामर्थ्यासिद्धिः, तस्यापि बीजत्वेनाङ्कुरोत्पत्तिस्वरूपयोग्यत्वात्, सहकारिसमवधानासमवधानयोर्विवक्षणे च तयोरेकस्मिन्नपि कालभेदेन समावेशसम्भवेन तयोर्विरोधासिद्ध्या स्वाश्रयभेदकत्वासम्भवात् ॥

न च–उक्तोभयसम्बन्धेन क्षणविशिष्टत्वस्य साध्यता न स्वीक्रियते येनोक्तदोषः स्यात्, किन्तु स्वाधिकरणसमयप्रागभावाधिकरणक्षणानुत्पत्तिकत्वे सति कादाचित्कत्वमेव साध्यम्, तच्च प्रागभावे प्रसिद्धमिति न साध्याप्रसिद्धिः। अत्र कादाचित्कत्वानिवेशे उत्पत्तिरहितनित्यवस्तुन्यात्मादौ अंशतस्सिद्धसाधनं स्यात्। अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतया तस्यादोषत्वेऽप्यर्थान्तरम्। आत्मादेर्नित्यत्वेऽप्युत्पत्तिविरहेणैवोक्तसाध्यनिर्वाहात्। अतः कादाचित्कत्वरूपविशेष्यदलम्–इति वाच्यम्॥ तन्मते अभावमात्रस्य तुच्छत्वेन कालसम्बन्धित्वासम्भवेन स्वाधिकरणक्षणप्रागभावाधिकरणक्षणाप्रसिद्ध्या साध्याप्रसिद्धेरेवमपि दुर्वारत्वात्॥ न च–सौगतमते अभावस्य तुच्छत्वेऽपि तस्य कालसम्बन्धोऽस्त्येव। किन्त्वर्थक्रियाकारित्वरूपसत्त्वमेव नेति न साध्याप्रसिद्धिरिति–वाच्यम्। एवमप्यर्थान्तरस्य दुर्वारत्वात्, आत्मादेर्महाप्रलयमात्रासत्त्वाङ्गीकारेणैव तस्य कादाचित्कत्वनिर्वाहात्॥ न च कादाचित्कत्वस्थाने उत्पत्तिमत्त्वनिवेशान्नोक्तार्थान्तरम्, साध्यप्रसिद्धिस्तु नैयायिकादिमते महाप्रलयात्मकचरमध्वंस एव, तत्र चरमध्वंसाधिकरणक्षणश्चरमध्वंसात्मक एवेति तत्प्रागभावाधिकरणक्षणानुत्पत्तिकत्वस्य तादृशचरमध्वंसात्मकक्षणोत्पत्तिकत्वस्य च सत्त्वात्; चरमध्वंससाधारणं क्षणत्वं च स्वाधेयपदार्थप्रागभावानधिकरणत्वमिति–वाच्यम्। तथापि साध्याप्रसिद्धेः, स्वाधिकरणसमय-

(टि.) स्ववृत्तित्वस्वभिन्नक्षणावृत्तित्वोभयेत्यर्थः॥

ध्वंसानधिकरणसमयसम्बन्धरूपोत्पत्तिमत्त्वस्य चरमध्वंसे अभावात्, स्वाधिकरणसमयस्य महाकालरूपस्य ध्वंसरूपस्य वा ध्वंसाप्रसिद्धेः॥ न च–स्वाधिकरणक्षणावृत्तिप्रागभावप्रतियोगिक्षणसम्बन्ध एवोत्पत्तिरिति महाप्रलयेऽपि तादृशोत्पत्तिसत्त्वान्नाप्रसिद्धिरिति–वाच्यम्। उक्तरीत्या नैयायिकमते कथञ्चित्साध्यप्रसिद्धावपि सत्त्वरूपसाधनवति दृष्टान्ते साध्यस्याप्रसिद्ध्या व्याप्तिग्रहासम्भवात्, केवलव्यतिरेकिणश्चाग्रे निरसिष्यमाणत्वात्। सिद्धान्ते त्वनादेः प्रागभावस्य नैयायिकाद्यभिमतमहाप्रलयस्य चानङ्गीकारेण साध्याप्रसिद्धिदुष्परिहरैव। सोऽयं घट इत्यादिप्रत्यभिज्ञाबाधितश्चेदमनुमानमित्यन्यत्र विस्तरः॥

इदानीमुद्देशक्रमानुसारेण प्रकृतिर्निरूप्यते॥ कालभिन्नत्वे सति जडत्वं प्रकृतेर्लक्षणम्। कालेऽतिव्याप्तिवारणाय सत्यन्तम्, जीवादिवारणाय विशेष्यम्॥ रजोगुणवत्त्वं तमोगुणवत्त्वं च तल्लक्षणम्; सत्त्ववत्त्वं तु न लक्षणम्, शुद्धसत्त्वाश्रयनित्यविभूतावतिव्याप्तेः॥ एवं नित्यविभूतित्वसमानाधिकरणभेदप्रतियोगितानिरूपितसंयोगसम्बन्धावच्छिन्नावच्छेदकताश्रयत्वे सति तद्भिन्नद्रव्यत्वसमानाधिकरणभेदप्रतियोगितानिरूपितसंयोगसम्बन्धावच्छिन्नावच्छेदकताशून्यत्वमपि तल्लक्षणम्॥ तदनन्तमसङ्ख्यातमप्रमाणञ्च–इति वचनेन प्रकृतेरधःप्रदेशेषु अपरिच्छिन्नत्वस्य नित्यविभूतेः तमःपरत्वश्रुत्या तद्देशे परिच्छिन्नत्वस्य च प्रमितत्वाल्लक्षणसङ्गतिः॥ कालादिरूपविभुद्रव्यवारणाय सत्यन्तम्, जीवादिरूपाणुवारणाय विशेष्यम्॥ तद्भिन्नद्रव्ये तदनवच्छिन्नत्वमपि निवेश्यम्, तेन नित्यविभूतिस्थजीवादिषु संयोगेन प्रकृतिमद्भेदसत्त्वेऽपि न क्षतिः॥ न च–प्रकृतेस्सर्वत्रावस्थाने गतिमतां गतिनिरोधापत्तिरिति गतियोग्यप्रदेशेष्वनवस्थानं स्वीकर्तव्यमित्युक्तलक्षणाव्याप्तिरिति–वाच्यम्। प्रकृतेः स्पर्शरहितत्वेन गतिनिरोधकताविरहेणाधोदेशे सर्वत्रावस्थाने बाधकाभावात्॥ सा च प्रकृतिस्सृष्टिकाले गुणवैषम्य-

युक्तप्रदेशविशेषे महदादीन्विषमविकारानारभते ; गुणसाम्ययुक्ते च समान्विकारानारभते ; प्रकृतिस्वरूपस्य सततविकारलक्षणत्वात् प्रलयकाले च सर्वत्र समा एव विकारा भवन्ति ॥ न च–प्रलयत्वव्याघातः, विषमविकारराहित्यस्यैव प्रलयपदार्थत्वात् ॥

पूर्वावस्थोपमर्दकावस्थाभेदात्सा चतुर्विंशतिधा–मूलप्रकृतिर्महानहङ्कार इन्द्रियाण्येकादश पञ्च तन्मात्राणि पञ्च भूतानि चेति ॥

ननु–एषा प्रकृतिर्निरंशा सांशा वा ?

आद्ये–अनेकतत्त्वात्मना परिणामानुपपत्तिः, निरंशस्यैकस्यानेकरूपेण परिणामासम्भवात्, मृत्पिण्डादेस्सावयवस्यैव घटशरावादिरूपेण बहुधा परिणामदर्शनात् ॥ न च–स्वभावतो निरंशस्यापि प्रधानस्यौपाधिकांशसम्भवाद्विविधकार्योत्पादकत्वसम्भवः ; नैयायिकनये स्वभावतो निरंशस्यापि गगनस्य भेर्यवच्छिन्नांशे तीव्रशब्दजनकत्वं, मृदङ्गाद्यवच्छिन्नांशे मृदुशब्दजनकत्वमित्यौपाधिकांशभेदस्यापि कार्यवैलक्षण्यनिर्वाहकत्वदर्शनादिति–वाच्यम् । तीव्रमन्दशब्दोत्पादकतावच्छेदकभेरीमृदङ्गादिवत् महदहङ्काराद्युत्पादकतावच्छेदकानांत्रयोविंशत्युपाधीनामदर्शनात् औपाधिकांशासम्भवात्, प्रधानस्य स्वभावतो निरंशत्वे पृथिवीत्वाद्यवस्थापन्नस्यापि तस्य छेदनाद्यनुपपत्तेः । औपाधिकभेदाभेदवादिनं प्रति भाष्ये उपाधिसंसर्गादपि निरंशस्य ब्रह्मणः छेदनाद्यनुपपत्तेरुक्तत्वात् ॥

द्वितीये तु–महदादिकार्याणामेकोपादानवादभङ्गः ; तत्तदंशानामेव तत्तत्कार्योत्पादकत्वेन बहूनामेव बहुकार्योत्पादकत्वात् । तादृशांशेषु प्रधानत्वरूपैकधर्माङ्गीकारस्य विफलत्वात् । परमाणुकारणवादादविशेषप्रसङ्गश्च ॥ तथा च तादृशांशानां परस्परसंयुक्तानामेव महदाद्युत्पादकत्वस्य वाच्यतया तादृशांशानां कृत्स्नसंयोगे स्वाधिकपरिमाणद्रव्यारम्भकत्वासम्भवः, एकदेशसंयोगे चांशस्याप्येकदेशाङ्गीकारेणा-

नवस्थेत्यादिरूपस्य 'महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्' इति सूत्रोक्तस्य परमाणुकारणवाददूषणस्य स्वमतेऽपि दुर्वारता ॥

—इति चेन्न ॥

अत्र महानुत्पद्यतां, अत्राहङ्कार उत्पद्यतां—इत्यादिरूपाणां त्रयोविंशतिभगवत्सङ्कल्पानामेव त्रयोविंशतितत्त्वोत्पादकतावच्छेदकत्वसम्भवेनौपाधिकांशवादे दोषाभावात्; भेर्यादिवद्भगवत्सङ्कल्पस्यापि द्रव्यत्वेन प्रधानसंयुक्ततया प्रधानप्रदेशावच्छेदकत्वसम्भवात् ॥ न च—भगवत्सङ्कल्पसंयोगोऽपि प्रधाने किमेकदेशावच्छेदेन कृत्स्नावच्छेदेन वेति विकल्पो दुर्निवार इति—वाच्यम् । भेरीसंयोगेऽपि तादृशविकल्पसाम्यात् । न च—भेरीसंयोगः स्वावयवावच्छेदेन गगने सम्भवतीति—वाच्यम्; तथाऽपि परमाणुगगनसंयोगे उक्तविकल्पस्य दुर्वारत्वात्॥ न च—अणुसंयोगावच्छिन्नगगन एवाणुसंयोगो जायते, आत्माश्रयस्त्वगत्या स्वीक्रियते; अत एव बौद्धाधिकारे शिरोमणिना घटाभावस्य स्ववृत्तित्वस्वीकारे आत्माश्रये इष्टापत्तिरभिहितेति—वाच्यम्। प्रकृतेऽपि तत्तद्भगवत्सङ्कल्पसंयुक्तप्रधान एव तत्तद्भगवत्सङ्कल्पसंयोगोत्पत्तिस्वीकारसम्भवादगत्या आत्माश्रयस्यादोषत्वात्॥

उक्तं च न्यायसिद्धाञ्जने—

"प्रदेशवृत्तिसंयोगाद्याधाराणुविभुक्रमात् ।
निरंशस्यापि घटते प्रादेशिकविकारिता ॥" —इति ॥

यथा अव्याप्यवृत्तिसंयोगादिर्गगनादौ निरंशेऽपि प्रदेशभेदेनोत्पद्यते, तथा महदादिकमपि निरंशे प्रधाने उत्पद्यत इत्यर्थः। न च छेदनाद्यनुपपत्तिः, पृथिवीत्वाद्यवस्थापन्नस्य तस्य छेदनाद्यङ्गीकारे बाधकाभावात् । न च भाष्यविरोधः, ब्रह्मस्वरूपस्य निष्कलत्वाच्छेद्यत्वादिवचनविरोधेन छेदनाद्यसम्भवे तद्भाष्यतात्पर्यात्; अन्यथा ब्रह्मस्वरूप एव सविकारत्वापत्तौ निर्विकारत्ववश्रुतेर्निरवकाशत्वप्रसङ्गात्;

ब्रह्मणस्सर्वज्ञत्वेन सर्वांशगतसुखदुःखादिप्रतिसन्धानप्रसङ्गस्यापि दुष्परिहरत्वात् । प्रधानस्य च पृथिवीत्वाद्यवस्थापन्नस्य छेदनाद्यङ्गीकारे प्रमाणविरोधस्य बाधकयुक्तेश्चाभावात् ॥

अत एव **तत्त्वमुक्ताकलापे** अव्यक्तप्रतिबन्दीं पुरस्कृत्य प्रवृत्ते ब्रह्मपरिणामवादे ब्रह्मणस्त्वस्मिन् जीवभावेन दुर्विषहदुःखाद्युत्पादनानुपपत्तिरेव दोष उक्तः ॥

"अव्यक्तं त्वन्मतेऽपि ह्यनवयवमथाप्येतदंशा विकाराः
ते चान्योन्यं विचित्राः पुनरपि विलयं तत्र तत्त्वेन यान्ति ।
इत्थं ब्रह्मापि जीवः परिणमति विहत्यर्थमित्यप्यसारं
स्वानर्थैकप्रवृत्तेः प्रसजति च तदा सर्वशास्त्रोपघातः ॥"—इति ॥

प्रधानस्य स्वाभाविकानन्तांशाङ्गीकारपक्षोऽपि निर्दुष्टः । न च—तत्कल्पे तदंशैरेव कार्यारम्भनिर्वाहात्तावदंशेषु प्रधानत्वरूपैकावस्थाङ्गीकारो विफल इति—वाच्यम् । तद्धेदं तर्ह्यव्याकृतमासीत्', 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं', 'तदैक्षत बहु स्याम्'--इत्यादिकारणबोधकश्रुतावेकत्वावस्थायाः प्रतिपन्नत्वेन तन्निर्वाहाय प्रधानत्वरूपैकावस्थाङ्गीकारस्य युक्तत्वात् । न चैवं—प्रधानस्य परमाणुपुञ्जमात्रत्वे पर्यवसानेन नैयायिकमतप्रवेश इति—वाच्यम् । गन्धरसरूपस्पर्शादिरहितपरस्पराप्रतिघातकसत्त्वरजस्तमोरूपगुणत्रयाश्रयपरस्परसंयुक्तपञ्चभूतसूक्ष्मतन्मद्रव्यरूपत्वेन "शब्दस्पर्शविहीनं तद्रूपादिभिरसंयुतम् । त्रिगुणं तज्जगद्योनिः"—इत्यादिप्रमाणसिद्धे प्रधाने परमाणुस्वभावगन्धाभावात्, जालरन्ध्रनिर्गतसौरालोकदृश्यमानत्रसरेणुशब्दवाच्यद्रव्यातिरिक्तपरमाणुकल्पने प्रमाणाभावाच्च ॥ न चैतत्कल्पे **महद्दीर्घवद्वे**—त्यादिसूत्रोक्तदोषप्रसङ्गः, अनुमानादिभिः कल्पितार्थ एव तादृशदोषस्योक्तत्वात् ; श्रुतिप्रतिपन्नार्थे तादृशदोषस्याप्रसरात्, अन्यथा माध्यमिकातिरिक्तमतसामान्ये तादृशदोषप्रसङ्गात्, अणुसंयोगे विभुसंयोगे ज्ञानज्ञेयसम्बन्धे जातिव्यक्तिसम्बन्धे कृत्स्नैकदेशविकल्पस्य

दुर्वारत्वात् ॥ विभुरीश्वरो घटादिभिरेकदेशेन संयुज्यते, सर्वात्मना वा ? एकदेशेन संयोगे तस्य सावयवत्वप्रसङ्गः । सर्वात्मना संयोगे च घटासंयुक्तप्रदेशस्यैवाभावेनेश्वरस्य पटादिसंयोगानुपपत्त्या विभुत्वानुपपत्तिरित्यादिदोषाणां तत्तत्पक्षेषु सम्भवात् । तस्मात् श्रुतिप्रतिपन्नार्थे नोक्तरीत्या दोषसम्भवः । अत एव—बहु स्यामिति सङ्कल्पानुरोधेनाकाशवाय्वादिरूपेण ब्रह्मणः कार्यत्वाभ्युपगमे कृत्स्नस्य ब्रह्मणः कार्यत्वापत्तिः, एकदेशतः कार्यत्वाभ्युपगमे च ब्रह्मणो निरवयवत्वश्रुतिविरोधः-इत्याशङ्कां **कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा** -इत्यनेनोपन्यस्य श्रुतिप्रतिपन्नार्थे ईदृशशङ्का न युक्तेत्यभिप्रायकं **श्रुतेस्तु शब्दमूलत्वात्** इति परिहारसूत्रमारचितम् ॥ तथा च—प्रधानस्यौपाधिकांशवत्त्वे स्वाभाविकांशवत्त्वे वा बाधकविरहान्महदादिविचित्रपरिणामहेतुत्वं तस्य सम्भवतीति दिक् ॥

तत्र गुणत्रयसाम्यावस्थापन्नत्वं मूलप्रकृतेर्लक्षणम् । तच्च तद्वैषम्यप्रयोज्यकार्याभाववत्त्वं, स्वजन्यत्वकालिकविशेषणत्वोभयसम्बन्धेन धर्मविशिष्टधर्माभाववत्त्वपर्यवसितम् । अव्यक्तत्वाश्रयानन्तांशेषु सत्स्वेव कतिपयांशेष्वव्यक्तत्वनाशपूर्वकमहत्त्वावस्थायाः महत्त्वाद्याश्रयानन्तांशेषु सत्स्वेव तन्नाशपूर्वकं कतिपयांशेष्वहङ्कारत्वाद्यवस्थाया उत्पत्तिस्वीकारेण पूर्वावस्थाकालीनत्वतज्जन्यत्वयोरुत्तरावस्थासु सत्त्वेन निरुक्तोभयसम्बन्धेन धर्मविशिष्टधर्माः अव्यक्तत्वविशिष्टमहत्त्वतद्विशिष्टाहङ्कारत्वादय इति तच्छून्यत्वस्य मूलप्रकृतौ सत्त्वाल्लक्षणसङ्गतिः॥

न च—

"वारिवह्न्यनिलाकाशैस्ततो भूतादिना बहिः ।
वृतं दशगुणैरण्डं भूतादिर्महता तथा ॥
अव्यक्तेनावृतो ब्रह्मन् तैस्सर्वैस्सहितो महान् ।
एभिरावरणैरण्डं सप्तभिः प्राकृतैर्वृतम् ॥"

इत्यादिना जलतेजोवाय्वाकाशाहङ्कारमहन्मूलप्रकृतीनामण्डावरणतया ऽवस्थानस्य सिद्धतया तथाऽवस्थाननिर्वाहाय, 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च' इत्यनेन अष्टद्रव्याणां शरीरारम्भकतयाऽवस्थानस्य भगवद्गीतादिसिद्धत्वेन तन्निर्वाहाय च प्रकृत्यादीनामेकदेशपरिणामो युक्तः। अन्यथा पृथिव्येकशेषप्रसङ्गेन प्रत्यक्षादिबाधापत्तेः। तन्मात्राणां त्वावारकत्वशरीरारम्भकत्वयोरश्रवणेन निश्शेषपरिणामाङ्गीकारेऽपि बाधकाभाव इत्युक्तलक्षणस्याकाशादावतिव्याप्तिः, आकाशत्वस्य शब्दतन्मात्रत्वजन्यत्वेऽपि तत्समानकालीनत्वाभावादिति—**वाच्यम्** ॥ तन्मात्राणामावारकत्वाद्यश्रवणेऽपि 'अष्टौ प्रकृतयष्षोडश विकाराश्शरीरे तस्य देहिनः' इत्यादिना शरीरस्य चतुर्विंशतितत्त्वमयत्वप्रतिपादनेन तेषां भूतैस्सहावस्थानसिद्ध्या तेषामप्येकदेशपरिणामत्वैव युक्तत्वात् ॥ न चैवं—**गीताभाष्ये** 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च' इति क्षेत्रारम्भकद्रव्याणीत्युक्तत्वाच्छरीरस्याष्टद्रव्योपादानकत्वाभ्युपगमाद्भाष्यकृतां तन्मात्राणां निश्शेषपरिणामपक्ष एवेष्ट इति—वाच्यम्; गीतातद्भाष्ययोरुपलक्षणपरत्वात्। अन्यथा—शरीरे एकादशेन्द्रियाणामप्यवस्थानासिद्ध्यापत्तेः ॥

न च—उक्तोभयसम्बन्धेन प्रकृतित्वविशिष्टाक्षरत्वाद्यवस्थायाः प्रकृतौ सत्त्वात्तच्छून्यत्वलक्षणस्यासम्भवः—इति वाच्यम्। अक्षरत्वावस्थायास्तमस्त्वावस्थानाशरूपत्वेन तज्जन्यत्वेऽपि प्रकृतित्वावस्थानाशरूपत्वाभावेन तज्जन्यत्वासम्भवात्, तन्नाशरूपत्वावस्थाया एव तज्जन्यत्वात्, प्रकृतित्वातिरिक्तत्वेन प्राथमिकधर्मविशेषणेनाक्षरत्वादीनां प्रकृतित्वजन्यत्वेऽपि क्षत्यभावाच्च। अविभक्ततमसः कृत्स्नत एव विभक्ततमोरूपेण विभक्ततमसः कृत्स्नत एवाक्षररूपेणाक्षरस्य च कृत्स्नत एवाव्यक्तरूपेण परिणामादुक्तधर्मचतुष्टये एकैकस्य जन्यतासम्बन्धेन अपरधर्मविशिष्टत्वेऽपि कालिकसम्बन्धेन तद्विशिष्टत्वा-

भावादसम्भवविरहात् ; अव्यक्तत्वप्रागभावासमानकालीनत्वेन प्राथमिकधर्मविशेषणेन अक्षरादीनां सुबालश्रुतावण्डावरणतयाऽवस्थानस्योक्त्या तमःप्रभृतीनां निश्शेषपरिणामासम्भवेऽपि न क्षतिः ॥ अव्यक्तत्वनाशप्रागभाववत्त्वं तस्या लक्षणं बोध्यम् ॥

सा च मूलप्रकृतिश्चतुर्था—अव्यक्तमक्षरं विभक्ततमोऽविभक्ततमश्चेति । तत्र महत्तत्त्वादिरूपफलोन्मुखावस्था अव्यक्तावस्था, तत्पूर्वावस्था चाक्षरत्वम्—इति रीत्या बोध्यम् ॥

"भूतलनिहितबीजस्थानीयमविभक्तं तमः, मृन्निस्मृतबीजवद्विभक्तं तमः, सलिलसंसृष्टार्द्रपृथ्ववयवबीजतुल्यमक्षरं, उच्छूनबीजसमानमव्यक्तं, अङ्कुरस्थानीयो महान्—इति विवेकः ॥"

इति **व्यासार्यैः सुबालोपनिषद्व्याख्याने** प्रपञ्चितम् । मूलप्रकृतावुक्तावस्थाचतुष्टयं च—

"महानव्यक्ते लीयते, अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते, तमः परे देव एकीभवति ॥"

इति सुबालश्रुतिसिद्धम् । तमः परे देव एकीभवतीत्यनेन अविभक्ततमोऽवस्थाभिधानात् ॥

ननु—उक्तसुबालश्रुतेर्मूलप्रकृतिगतावस्थाचतुष्टयपरत्वं न सम्भवति; **सा च प्रशासनादिति** सूत्रावतरणभाष्यादिषु—'अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते', 'यस्याव्यक्तं शरीरं यस्याक्षरं शरीरम्' इत्यादिश्रुतिगताव्यक्तसहचरिताक्षरशब्दस्य जीवपरतया व्याख्यानात्—इति चेत् ॥

---

१. (पा.) तन्मात्राणां निश्शेषपरिणामाभ्युपगमे तु स्वजन्यत्वस्थाने स्वप्रयोज्यत्वं निवेश्यम् । तन्मात्रत्वस्य नाशेऽपि तज्जनकीभूताहंकरत्वादेरनाशेन तद्विशिष्टाकाशत्वादेः आकाशादौ सत्त्वान्नातिव्याप्तिः । महत्त्वावस्थाप्रागभाववत्त्वं वा तल्लक्षणमवसेयम् ॥

अत्राहुः—

उक्ताक्षरशब्दव्याख्यानस्य परव्याख्यानानुरोधेन प्रवृत्तत्वान्न तत्र तात्पर्यम्। यद्वा—जीवे धर्मभूतज्ञानगतसङ्कोचविकासादिरूपविकारस्य परम्परया सत्त्वेऽपि साक्षात्सम्बन्धावच्छिन्नविकाराभाववाचकाक्षरशब्दस्य प्रवृत्तिर्यथा न विरुध्यते, तथा महत्त्वाहङ्कारत्वादिरूपविकारविशेषाभावपरत्वे मूलप्रकृतावपि तच्छब्दप्रवृत्तिरुपपद्यत इति दृष्टान्तविधया जीवपरताप्रतिपादनपरत्वान्न विरोधः॥ अथवा—मूलप्रकृतौ विकारसामान्याभावस्य बाधेन तद्वाचकाक्षरशब्दस्य मुख्यत्वासम्भवात् अक्षरब्रह्मसम्बन्धित्वेन वा तादृशजीवसम्बन्धित्वेन वा लक्षणा वाच्या, तत्र ब्रह्मसम्बन्धित्वेन लक्षणोक्तौ विशेषणे लयान्वयासम्भवात् विशेष्यमात्रे लयान्वयस्य विशिष्टे लयान्वयप्रकरणविरोधेनासम्भवात्, जीवसम्बन्धित्वावच्छिन्न एवाजहल्लक्षणेत्यभिप्रायेण तद्ग्राह्यस्य प्रवृत्तत्वान्न विरोधः॥ —इति॥

तत्र अव्यक्तत्वावस्थानाशरूपत्वे सत्यहङ्कारत्वावस्थाप्रागभावरूपत्वं—**महत्त्वावस्थाया लक्षणम्**; अव्यक्तत्वावस्थानाशत्वस्याहङ्कारत्वतन्मात्रत्वादिसाधारणत्वात्तद्वारणाय विशेष्यम्; तावन्मात्रस्याव्यक्तत्वाक्षरत्वादिसाधारण्यात्तद्वारणाय सत्यन्तम्॥ यद्वा—अव्यक्तत्वावस्थाध्वंसत्वावच्छिन्नविषयताकसङ्कल्पजन्यावस्थात्वं—तल्लक्षणम्; अव्यक्तत्वावस्थाश्रयेष्वनन्तांशेषु मध्ये केषु चिदंशेषु अव्यक्तत्वावस्थाध्वंसरूपमहत्त्वावस्थोत्पद्यतामिति—सङ्कल्पेन तादृशावस्थोत्पत्तेर्लक्षणसङ्गतिः। अत्र सङ्कल्पनिष्ठजनकता विषयतासम्बन्धावच्छिन्ना ग्राह्या, तेन तादृशसङ्कल्पगतोत्तरावस्थायां नातिव्याप्तिः। अव्यक्तत्वावस्थान्यूनवृत्तित्वे सत्यहङ्कारत्वावस्थाव्यापकप्रकृतिविभाजकोपाधिमत्त्वं वा तल्लक्षणम्; अव्यक्तत्वाक्षरत्वादिवारणाय सत्यन्तम्, अहङ्कारत्वादिवारणाय विशेष्यम्। व्यापकत्वं च तत्समानाधि-

करणभेदप्रतियोगितानवच्छेदकत्वे सति तदभाववद्वृत्तित्वम्; तेनाहङ्कारत्वादेस्तद्व्यापकत्वेऽपि न तद्दोषतादवस्थ्यम् । प्रकृतिविभाजकोपाधित्वनिवेशादव्यक्तत्वन्यूनवृत्त्यहङ्कारत्वव्यापकान्यतमत्वादौ नातिव्याप्तिः ॥

सोऽयं महांस्त्रिविधः–सात्त्विकराजसतामसभेदात्। सत्त्वगुणोन्मेषवान् सात्त्विक इत्यादिबोध्यम् ॥

महत्त्वावस्थानाशरूपत्वे सति तन्मात्रत्वावस्थाप्राक्कालीनत्वं–**अहङ्कारत्वस्य लक्षणम्** । अत्र तन्मात्रत्वावस्थाप्रागभावत्वस्य तामसाहङ्कारत्व एव सत्त्वात्सात्त्विकराजससाधारणाहङ्कारत्वे तदभावादसम्भवः प्राप्नोतीति न तथा निवेशः। तन्मात्रत्वपूर्वकालीनत्वं चाहङ्कारत्वे अक्षतमेव । व्यावृत्तिः पूर्ववत् । महत्त्वावस्थानाशत्वावच्छिन्नविषयताकसङ्कल्पप्रयोज्यावस्थात्वं वा तल्लक्षणं; महत्त्वावस्थान्यूनवृत्तित्वे सति तन्मात्रत्वावस्थाव्यापकप्रकृतिविभाजकोपाधित्वमपि तल्लक्षणमवसेयम् ॥

सोऽयमहङ्कारस्त्रिविधः–सात्त्विकराजसतामसभेदात् । तत्र सात्त्विकादिन्द्रियाणि जायन्ते, तामसाच्च शब्दतन्मात्रं, राजस उभयानुग्राहकः ॥

तत्र शब्दाश्रयान्यत्वे सति आत्मप्रयत्नजन्यव्यापारवत्त्वरूपजीवात्मोपकरणत्वं–**इन्द्रियसामान्यलक्षणम्** । शरीरप्राणयोरतिव्याप्तिवारणाय सत्यन्तम् । महदहङ्कारवारणाय विशेष्यम् ॥

न च–अप्राकृतद्रव्ये अव्यक्तमहदहङ्कारविभागाभावेन अप्राकृतेन्द्रियाणामप्राकृतभूतपरिणामत्वस्यैव वाच्यतया तेषु शब्दाश्रयान्यत्वघटितोक्तलक्षणाव्याप्तिरिति–वाच्यम् । अप्राकृतद्रव्येऽप्यव्यक्तमहदहङ्कारविभागस्य कैश्चिदाचार्यैरङ्गीकारादप्राकृतेन्द्रियाणां तत्परिणामत्वसम्भवात्, प्राकृतशब्दाश्रयान्यत्वस्य सत्यन्तार्थत्वे तद्दोषा-

प्रसक्तेश्च । प्राकृतत्वं च–रजस्समानाधिकरणत्वं तमस्समानाधिकरणत्वं वा ॥

न च–**श्रीमद्गीताभाष्ये** "महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च" इति श्लोकव्याख्याने 'अव्यक्तमहदहङ्कारपञ्चमहाभूतारब्धं शरीरम्' इत्युक्तत्वेन अतिरिक्तावयविनमनङ्गीकुर्वाणानां वेदान्तिनां मते शरीरस्योक्ताष्टद्रव्यसमुदायरूपत्वे पर्यवसानात्तादृशशरीरघटकाव्यक्तमहदहङ्कारेष्वतिव्याप्तिः ; तेषां शब्दाश्रयान्यत्वे सत्यात्मप्रयत्नजन्यव्यापारवत्त्वादिति–वाच्यम्। तेषां शरीरघटकत्वेऽप्यात्मप्रयत्नजन्यव्यापारवत्त्वानभ्युपगमात्, पञ्चमहाभूतात्मकभागेष्वेव तत्स्वीकारात्; शब्दाश्रयान्यत्वं परित्यज्य प्राणशरीरान्यत्वनिवेशे तादृशभागेष्वतिव्याप्त्यप्रसक्तेश्च, तेषां शरीरान्यत्वाभावात् ॥ एतेन मुक्तादिशरीरे उक्तलक्षणस्यातिव्याप्तिरिति निरस्तम् ॥

इन्द्रियं द्विविधं–प्राकृतमप्राकृतं चेति। रजोरहितत्वे सति तमोरहितत्वे सति वा इन्द्रियत्वमप्राकृतेन्द्रियलक्षणम्। सात्त्विकाहङ्कारोपादानकत्वं प्राकृतेन्द्रियस्य लक्षणं; जीवगमनव्यापकगमनवदिन्द्रियत्वं वा प्राकृतेन्द्रियलक्षणम्, यदा जीवगमनं तदेन्द्रियगमनमिति व्याप्तेः ॥

यद्यपि–मुक्तिकाले जीवगमनेऽपि नेन्द्रियगमनमिति न व्यापकत्वसम्भवः। **तथाऽपि** बद्धजीवगमनव्यापकगमनवत्त्वस्य लक्षणत्वान्न दोषः ॥ न च–कर्मेन्द्रियाणां हस्तपादादीनां शरीरेण सह विनाशदर्शनाज्जीवेन सह गमनासम्भवादुक्तलक्षणस्य तत्राव्याप्तिरिति–वाच्यम्। इन्द्रियाधिष्ठानभूतस्य भौतिकहस्तपादादेर्नाशेऽपि तदधिष्ठानकस्याहङ्कारिकस्येन्द्रियस्य शरीरनाशकाले नाशानुपलम्भेन जीवेन सह गमनोपपत्तेः; तेषां शरीरेण सह नाश इति यादवप्रकाशपक्षस्यायुक्तत्वात्। हस्तादीनां प्रतिशरीरमुत्पत्तिविनाशाभ्युपगमे 'अष्टौ प्रकृतयष्षोडश विकाराः', 'चतुर्विंशतिसङ्घातमव्यक्तं व्यक्तमुच्यते'–इत्यादिश्रुत्यभि-

हिततत्त्वसङ्ख्चाया विकारसङ्ख्चायाश्च विरोधप्रसङ्गात्, पृथिव्युत्पत्ति-प्रतियोगिकध्वंसपूर्वकालीनोत्पत्तिकानामेव तत्त्वरूपत्वात् । अन्यथा घटपटादीनामपि तत्त्वरूपतापत्त्या तत्त्वसङ्ख्चाधिक्यप्रसङ्गात् । "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति, प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इति श्रुतौ सर्वपदेनेन्द्रियत्वव्यापकोत्क्रमणप्रतीतेश्च ॥

यद्यपि–'सर्वेभ्यो दर्शपूर्णमासौ' इत्यादौ सर्वपदस्य प्रक्रान्तकति-पयवस्तुपरत्वं दृश्यते । **तथाऽपि**–अभेदसम्बन्धेन किञ्चिद्धर्मावच्छिन्न-विशेषणतापन्नसर्वशब्दस्योद्देश्यतावच्छेदकव्यापकविधेयव्याप्यसर्वत्व-वच्छिन्नबोधकत्वस्य व्युत्पत्तिसिद्धत्वान्न प्रकृते सर्वशब्दस्य सङ्कुचित-वृत्तिकत्वं युक्तम् ॥ स्पष्टं चेदं **प्रतिज्ञालक्षणगादाधर्याम्** ॥ किञ्च **अग्न्यादिश्रुतेरिति चेन्न भाक्तत्वादिति** सूत्रे 'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वायुं प्राणश्चक्षुरादित्यम्' इत्यादिना प्राणानां जीवमरणकाले अग्न्यादिष्वप्ययश्रवणान्न तेषां जीवेन सह गमन-मित्याशङ्क्याप्ययश्रवणस्य देवतापक्रमणपरत्वान्न दोष इति समाधा-नेन कर्मेन्द्रियस्य वाचो जीवेन सह गमनस्य स्थापितत्वात् तन्न्यायेन सर्वेषामपि गमनाङ्गीकारस्य युक्तत्वात् ॥

न च–वेदान्तदीपे **हस्तादयस्तु स्थितेऽतो नैवमिति** सूत्रे—

> "तत्र श्रोत्रादीनि जीवेन सह शरीरान्तरगमनेऽपि गच्छन्ति । वाग्घस्तादीनि कर्मेन्द्रियाणि तु स्थिते शरीरे तेनैव सहोत्पत्ति-विनाशयोगिन्युपकारकाणि ॥"

इत्युक्तं विरुध्येतेति–वाच्यम् । उदाहृतवेदान्तदीपवाक्यस्य परमत-वद्धस्तादीनां प्रतिशरीरमुत्पादविनाशाभ्युपगमेऽपि तेषामिन्द्रियत्वं सिद्धतीत्यत्र तात्पर्यात्तेषां शरीरेण सहोत्पादविनाशवत्त्वे तात्पर्य-विरहात् । अत एव **सारे** तत्सूत्रमन्यथा व्याख्यातं—"हस्तादयोऽ पीन्द्रियाणि, जीवे देहान्तरवस्थिते उपकारकत्वाविशेषात्"—इति ॥

एवमेव भाष्येऽपि व्याख्यातं "न सप्तैवेन्द्रियाणि अपित्वेकादश-हस्तादीनामपि शरीरे स्थिते जीवे तस्य भोगोपकरणत्वात्॥"-इति॥

न च-सूत्रघटकस्थित इत्यस्य दीपोक्तरीत्या शरीरे स्थित इत्यर्थकत्वे शरीरेण सहोत्पत्तिविनाशवत्त्वं हस्तादीनां प्रतीयते, सारभाष्योभयरीत्या शरीरान्तरवस्थिते जीवे हस्तादीन्युपकारकाणीत्यर्थकत्वे च स्थित इत्यस्य वैयर्थ्यं; चक्षुरादीनामपि शरीरे जीवावस्थानदशायामेवोपकरणत्वेन तद्व्यावर्तकत्वासम्भवात्; तथा च दीपोक्तयोजनाया एव युक्तत्वाद्धस्तादीनां शरीरेण सहोत्पत्तिविनाशवत्त्वेऽपि सूत्रादितात्पर्यमस्तीति-वाच्यम्। सारभाष्योक्तयोजनायामपि दोषाभावात्। शरीरान्तरवस्थिते जीवे हस्तादीन्युपकारकाणीत्यत्र जीव इत्यस्य कर्तरीत्यर्थकत्वेनेच्छाविषयकार्यजनकत्वरूपोपकारकत्वघटककार्ये जीवकृतिजन्यत्वलाभाद्धस्तादिजन्यादानादिरूपकार्ये जीवकृतिजन्यत्वं चक्षुरादिजन्यसाक्षात्कारे च तदजन्यत्वमिति वैलक्षण्यसूचकतया स्थित-इत्यस्य सार्थकत्वात्। पाथसि पीते तृष्णा शाम्यतीत्यादाविव सति सप्तम्या जन्यजनकभावलाभात्। यद्वा-शरीरान्तरवस्थिते जीवे उपकारकाणीत्यस्य जीवाधिकरणीभूतशरीरावच्छेदेनादानादिकार्यजनकानीत्यर्थः; चक्षुरादीनि तु वृत्त्या शरीरानवच्छिन्ने घटादिदेशेऽपि चाक्षुषादिरूपकार्यजनकानीति चक्षुरादीनां वृत्त्या कार्यजनकत्वं, हस्तादीनां तन्निरपेक्षकार्यजनकत्वमिति वैलक्षण्यसूचकतया स्थित इत्यस्य सार्थकत्वात्॥

यद्यपि-'सप्तगतेर्विशेषितत्वाच्च' इति पूर्वपक्षसूत्रे सप्तानां गतिश्रवणात्सप्तैवेन्द्रियाणीत्यर्थके गतेरित्यस्य प्रतिकोटितया **हस्तादय** इति सिद्धान्तसूत्रे स्थित इत्यस्योपादानात्; हस्तादीनां गतिर्नास्तीति स्वरसतः प्रतीयते। **तथाऽपि**-भौतिकेन्द्रियवादे दोषस्योक्तत्वा-

दाहङ्कारिकेन्द्रियपक्षे च तादृशार्थासम्भवादुक्तार्थ एव युक्त इति बोध्यम् ॥

न चैवमपि—जीवस्य परकायप्रवेशदशायामिन्द्रियादीनामगमनाद-व्याप्तिरिति—वाच्यम् । जीवस्य स्वेन्द्रियैस्सहैव परकाये प्रवेशात् ; अन्यथा तच्छरीरावच्छेदेनेन्द्रियकार्याणामनुत्पत्तेः । मृतशरीरे प्रवेशस्थले तदीयेन्द्रियाणामभावात्तन्न्यायेन जीवविशिष्टशरीरप्रवेशस्थलेऽपीन्द्रियैस्सह प्रवेशाङ्गीकारस्य युक्तत्वात् अन्यदीयेन्द्रियाणामन्यादृष्टोपार्जितानामेतदुपकारकत्वासम्भवात् ;

"शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥"

इति स्मृतेश्च ॥ तथा च—पूर्वपरित्यक्ते स्वशरीरे मृतकायप्रवेशवत् पुनरिन्द्रियैस्सह प्रवेशः ॥

न च—**प्रदीपवदावेशस्तथा हि दर्शयतीति** सूत्रे योगिनां एकदा अनेकशरीरेषु प्रवेशो ज्ञानव्याप्त्येत्युक्तम् , तत्रेन्द्रियाणामभावात् कथं तत्कार्यनिर्वाहः—इति वाच्यम् । तत्रानेकशरीरेष्विन्द्रियाणामपि प्रतिशरीरं विविक्ताभिर्वृत्तिभिरीश्वरसङ्कल्पेन प्रसृताभिः कार्यनिर्वाहाङ्गीकारात् ॥ उक्तञ्च **न्यायसिद्धाञ्जने**—

"प्रतिदेहं विविक्तानि मनःप्रभृतिकान्यपि ।
इन्द्रियाणीश्वरेच्छाद्यैः प्रवर्तन्ते तु योगिनः ॥" —इति ॥

एवमेव स्वप्ने भगवता सृष्टेष्वपि देहेष्विन्द्रियकार्यनिर्वाहो वृत्तिभिरेव बोध्यः ॥

पुनरिन्द्रियं द्विविधं—ज्ञानेन्द्रियकर्मेन्द्रियभेदात् ॥

ज्ञानप्रसरणहेतुत्वे सतीन्द्रियत्वं—ज्ञानेन्द्रियत्वम् । इन्द्रियसंयोगेऽतिव्याप्तिवारणायेन्द्रियत्वनिवेशः । न च—अप्राकृतज्ञानेन्द्रियेष्वव्याप्तिः, नित्यमुक्तेश्वराणां ज्ञानस्येन्द्रियाधीनप्रसरणवत्त्वाभावादिति—वाच्यम् ;

ज्ञानप्रसरणहेतुतावच्छेदकधर्मवत्त्वस्य विवक्षितत्वात्, अप्राकृतेन्द्रियेष्वपि तादृशहेतुतावच्छेदकचक्षुष्ट्वादिमत्त्वस्याक्षतत्वात्॥**तच्च षड्विधम्**--मनश्श्रोत्रस्पर्शननयनरसनघ्राणभेदात्। तत्र मनस्स्पर्शननयनानां द्रव्यग्राहकेन्द्रियत्वम्, अन्येषां तदग्राहकेन्द्रियत्वं लक्षणम्। यद्यपि--सर्वेषामेवेन्द्रियाणां तत्तत्कालविशिष्टवस्तुग्राहकत्वाद्द्रव्यग्राहकत्वमविशिष्टं; तथाऽपि--द्रव्यपदेन कालातिरिक्तद्रव्यमेव विवक्षितमिति न दोषः। कालस्य षडिन्द्रियवेद्यत्वं च वक्ष्यते ॥

तत्र श्रावणस्पार्शनोभयजनकेन्द्रियत्वं--**मनसो लक्षणम्**। श्रावणजनकत्वमात्रोक्तौ श्रोत्रे, स्पार्शनजनकत्वमात्रोक्तौ त्वगिन्द्रियेऽतिव्याप्तिः; अत उभयनिवेशः। तावन्मात्रोक्तौ चात्मादावतिव्याप्तिः; अत इन्द्रियत्वनिवेशः। एवं स्पार्शनचाक्षुषोभयादिघटितमपि लक्षणान्तरमूह्यम् ॥ न चोक्तलक्षणस्याप्राकृतमनस्यव्याप्तिः; नित्यमुक्तादिज्ञानस्येन्द्रियान्तराधीनप्रसरणवत्त्वाभावेऽपि मनोऽधीनप्रसरणस्याङ्गीकारात्; 'मनसैतान्कामान् पश्यन् रमते' इति श्रुत्या मुक्तादिज्ञानेऽपि मनोधीनप्रसरणबोधनात्, श्रावणस्पार्शनोभयजनकतावच्छेदकधर्मघटितलक्षणसम्भवाच्च ॥ स्मृतिजनकतावच्छेदकधर्मवदिन्द्रियत्वं वा **मनोलक्षणम्**, हृत्प्रदेशमात्रवृत्तित्वं वा **तल्लक्षणम्**। न च--'अनवस्थितेरसम्भवाच्च नेतरः' इति सूत्रभाष्ये जीवस्यापि सर्वेन्द्रियव्यापारानुगुणत्वाय सर्वेन्द्रियकन्दभूते स्थानविशेषे वृत्तिरिति चक्षुषि नावस्थानमित्युक्तत्वाज्जीवेऽतिव्याप्तिरिति--वाच्यम्। इन्द्रियत्वस्यापि निवेशात्, चक्षुरादीनां च स्वस्वाधिष्ठाने हृत्प्रदेशे च वर्तमानत्वेऽपि न तन्मात्रवृत्तित्वमिति नातिव्याप्तिः ॥

तदेकमेव मनः वृत्तिभेदात् बुद्ध्यहङ्कारचित्तसंज्ञां लभते, न तु बुद्ध्यादिकमिन्द्रियान्तरम्। न च--सुबालोपनिषदि 'चक्षुश्च द्रष्टव्यं च नारायणः' इत्यादिना पञ्च ज्ञानेन्द्रियाण्युक्त्वा--

"मनश्च मन्तव्यं च नारायणः, बुद्धिश्च बोद्धव्यं च नारायणः,
अहङ्कारोऽहङ्कर्तव्यं च नारायणः ॥"

इत्याम्नानात्, अनन्तरं च कर्मेन्द्रियाणां गणनात्, बुद्ध्यादीनामपीन्द्रियान्तरत्वं प्रतीयत इति–वाच्यम् । वृत्तिभेदादेव पृथग्गणनोपपत्तेः ; प्राणस्य वृत्तिभेदात्प्राणापानादिरूपेण पृथक्परिगणनवन्मनसोऽपि वृत्तिभेदात् पृथगभिधानोपपत्तेः । कामसङ्कल्पविचिकित्सादयोऽपि मनोवृत्तिविशेषाः–'कामस्सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इति श्रुतेः, **पञ्चवृत्तिर्मनोवद्व्यपदिश्यते** इति सूत्रभाष्ये कामादीनां मनोवृत्तित्वाभिधानाच्च । "कामादयोऽध्यवसायादयश्च पुरुषधर्मा एव । उक्तश्रुतौ कामादिपदस्य आयुर्घृतमित्या दाविव तज्जनके लाक्षणिकत्वात्" इत्युक्तं सर्वार्थसिद्धौ ॥

नचैवं–पञ्चवृत्तिर्मनोवद्व्यपदिश्यते इति सूत्रभाष्यविरोधः, तत्र कामादीनां मनोवृत्तिविशेषत्वाभिधानात् ; एवं सप्तगतेरित्यधिकरणभाष्यविरोधश्च, तत्राध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यत इत्युक्तत्वादिति–वाच्यम् । कामत्वाध्यवसायत्वाद्यवस्थाश्रयज्ञानजनकत्वादिरूपतत्तदवस्थाविशिष्टस्य मनस एव कामसङ्कल्पादिशब्दैर्बुद्ध्यहङ्कारादिशब्दैश्च व्यपदेशस्योदाहृतभाष्याभिप्रेततया **श्रुतप्रकाशिकान्यायसिद्धाञ्जनयोः** प्रतिपादितत्वात् ॥

अन्ये तु–'पञ्चवृत्तिर्मनोवद्व्यपदिश्यते' इति सूत्रे श्रुतौ च मनःपदं धर्मभूतज्ञानपरम् । नचैवं लक्षणाप्रसङ्गः, "मनश्चेतस्संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा ज्योतिस्स्मृतिस्सङ्कल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति" इति **ऐतरेयश्रुत्या** मनःपदस्य ज्ञाने शक्त्यभिधानात् । तथा च–धर्मभूतज्ञानस्य यथा कामादिवृत्तिमत्त्वं, तथा प्राणस्य प्राणापानादिवृत्तिमत्त्वमिति दृष्टान्तसामञ्जस्यम्–**इत्याहुः** ॥

स्पर्शविषयकसाक्षात्काराजनकत्वे सति शब्दविषयकसाक्षात्कारजनकेन्द्रियत्वं–श्रोत्रस्य लक्षणम्। मनस्यतिव्याप्तिवारणाय सत्यन्तं, चक्षुष्यतिव्याप्तिवारणाय शब्दविषयकसाक्षात्कारजनकेति, श्रोत्रसंयोगेऽतिव्याप्तिवारणायेन्द्रियत्वमिति। तच्च मनुष्यादीनां कर्णशष्कुल्यवच्छिन्नप्रदेशवृत्तिः द्विनिह्वादीनां नयनवृत्तीति ज्ञेयम् ॥

ननु–एकादशेन्द्रियाणामपि अणवश्चेति सूत्रेणाणुत्वाभिधानात् श्रोत्रस्याणुरूपस्य कथं दूरस्थशब्दग्राहकत्वम्। न च–गगने वीचीतरङ्गन्यायेन शब्दधारायां उत्पत्त्यङ्गीकारात् श्रोत्रसम्बद्धस्य शब्दस्य तेन ग्रहणं युज्यत इति–वाच्यम्। तथा सत्यनन्तशब्दकल्पनाप्रसङ्गेन गौरवात्; श्रोत्रदेशोत्पन्नस्यैव ग्रहणे प्राच्यां शब्दः, प्रतीच्यां शब्दः, दूरे शब्दः, समीपे शब्द इत्यादिप्रतीत्यनुपपत्तिश्च–इति चेत् ॥

अत्र केचित्–श्रोत्रस्याणुत्वेऽपि शब्दोत्पत्तिदेशपर्यन्तं प्रसृतया तद्वृत्त्या शब्दस्य सम्बन्धात् दूरस्थशब्दग्रहोपपत्तिः, प्राच्यां शब्दो दूरे शब्द इत्यादिप्रतीत्युपपत्तिश्च। वीणायाः शब्दं शृणेमीत्यादिव्यवहारस्याप्युपपत्तिः; वीचीतरङ्गन्यायेन शब्दोत्पत्तिपक्षे वीणाजन्यशब्दस्याश्रवणात्तदनुपपत्तिः–इत्याहुः ॥

वस्तुतस्तु–'शब्दगन्धसूर्यालोकरत्नप्रभादयो धर्म्यतिवर्तिनो गतिमन्तश्च' इति आत्मसिद्धिवाक्यानुरोधात्, शब्दाश्रयस्य वाय्वादिभूतस्य श्रोत्रदेशागमनात् शब्दस्य सन्निकृष्टत्वात् शब्दप्रत्यक्षोपपत्तिः। उक्तात्मसिद्धिवाक्ये गन्धपदं शब्दपदं च तत्तदाश्रयद्रव्यपरं; यथा गन्धाश्रयपार्थिवभागानां वायुना समानीतत्वाद्दूरस्थचम्पकादेर्गन्धो घ्राणेन गृह्यते, तद्वत् शब्दोपीति भावः। अत एवानुकूलवातदशायां दूरस्थस्यापि शब्दस्य गहणं, प्रतिकूलवाते च समीपस्थस्याप्यग्रहणमित्युपपद्यते। एवं भेर्यां ताड्यमानायां प्रथमं समीपस्थानां पुरुषाणां शब्दप्रत्यक्षं, अनन्तरं च विप्रकृष्टानां प्रत्यक्षं, गृहान्तर्गतानामस्फुटं

दूरस्थशब्दग्रहणं, बहिर्निर्गतानां च स्फुटं तद्ग्रहणमित्यादिकं चोपपद्यते। न च–प्रतिकूलवातेन श्रोत्रवृत्तेर्निरोधान्न तदा शब्दग्रहणं, समीपस्थानां च झडिति वृत्तिप्रसरणादविलम्बेन शब्दग्रहणं, ग्रहान्तर्गतानां तु श्रोत्रवृत्तौ कतिपयांशस्य कुड्यादिना निरोधादल्पांशानां प्रसरणादस्फुटग्रहणमिति रीत्या वृत्तिगमनपक्षेऽप्युपपत्तिरिति--वाच्यम्। भेर्यादिशब्देन गुहासौधादौ प्रतिशब्दोत्पादस्य चलनस्य च तादृशशब्दाश्रयद्रव्याभिघातमन्तरेणानुपपत्तेश्शब्दाश्रयद्रव्यागमनपक्षस्यैव युक्तत्वात् ॥

उक्तं च सर्वार्थसिद्धौ—

"गुहासौधादिसङ्क्षोभः प्रतिशब्दश्च जृम्भते।
निस्साणादिप्रणादेन तदेतत्पक्षसङ्गतम् ॥" —इति ॥

न चैतत्पक्षे प्राच्यां शब्द इत्यादिप्रतीत्यनुपपत्तिः। प्राच्यास्समागतवायुना शब्दोपलम्भेन शब्दे प्राच्यादित्वप्रतीतेरानुमानिकत्वात्। एतदप्युक्तं तत्रैव—

"यथा मयूरवीणादेश्शब्दोऽयमिति गृह्यते।
तथा प्राच्यादिशब्दोयमिति लिङ्गात्तथा विधात्॥"—इति ॥

तस्मात् शब्दाश्रयद्रव्यागमनपक्षे न कोऽपि दोष इति दिक् ॥

रूपाग्राहकत्वे सति स्पर्शग्राहकेन्द्रियत्वं–त्वगिन्द्रियलक्षणम्। मनस्यतिव्याप्तिवारणाय सत्यन्तं, श्रोत्रेऽतिव्याप्तिवारणाय स्पर्शग्राहकेति, त्वगिन्द्रियसंयोगवारणायेन्द्रियत्वमिति। त्वगिन्द्रियं च सर्वशरीरवृत्ति, अणुत्वेऽपि तस्य विकासशक्त्या वृत्तिद्वारेण वा तस्य शरीरव्यापकत्वसम्भवात्। अत एव पिपीलिकादिशरीरस्थस्य स्पर्शनस्य विकासावस्थयैव गजादिशरीरप्रवेशे तादृशशरीरव्यापकत्वं, गजादिशरीरस्थस्य च तस्य सङ्कोचावस्थया पिपीलिकादिशरीरव्यापकत्वमुपपद्यते। नखदन्तकेशादिषु प्राणमान्द्यतारतम्यात् स्पर्शानुपलम्भः ॥

स्पर्शाग्राहकत्वे सति रूपग्राहकेन्द्रियत्वं–**चक्षुषो लक्षणम्**। तच्च नयनवृत्ति, एतस्य च वृत्तिप्रसरणेन विषयदेशप्राप्त्या दूरस्थपदार्थग्राहकत्वं 'दिवीव चक्षुराततम्' इति श्रुतिव्यवहारस्वारस्याच्चक्षुषो वृत्त्यङ्गीकारस्य युक्तत्वात्। कुड्यादिव्यवधानस्थले कुड्यादिना अञ्जनाद्यसंस्कृतनेत्रवृत्तेः प्रतिरोधान्न व्यवहितार्थग्राहकत्वम्। अञ्जनादिसंस्कृतनेत्रवृत्तेः कुड्यादावपि प्रवेशादञ्जनसंस्कृतचक्षुषां व्यवहितार्थग्रहोपपत्तिः। काचजलाद्यच्छद्रव्याणां च वृत्तिनिरोधकत्वाभावात्तद्व्यवहितानामपि चक्षुषा ग्रहणमुपपन्नम्। ज्ञानेन्द्रियेषु चक्षुष एकस्यैव विषयदेशं गत्वा तद्ग्राहकत्वं, अन्येषां तु स्वदेशप्राप्तविषयग्राहकत्वमिति–विवेकः। पिपीलिकादीनां रसनं पक्ष्यादीनां घ्राणमपि वृत्त्या विषयदेशं गत्वा तद्ग्राहकमित्यनुभवानुसारात् कल्पयन्ति॥

रूपाग्राहकत्वे सति रसग्राहकेन्द्रियत्वं–**रसनेन्द्रियलक्षणम्**। तच्च जिह्वाग्रवर्ति॥

रसाग्राहकत्वे सति गन्धग्राहकेन्द्रियं–**घ्राणं**, तच्च नासाग्रवर्ति॥

उक्तानामिन्द्रियाणां द्रव्यप्रत्यक्षे संयोगः। द्रव्याश्रितानां रूपादीनां प्रत्यक्षे संयुक्तापृथक्सिद्धत्वं सन्निकर्ष इति बोध्यम्॥

उच्चारणाद्यन्यतमजनकेन्द्रियत्वं–**कर्मेन्द्रियसामान्यलक्षणम्**। तच्च वाक्पाणिपादपायूपस्थभेदात् **पञ्चधा**। तत्र वर्णोद्देश्यककृतिजन्यव्यापारवदिन्द्रियं **वाक्**। अत्र जिह्वादावतिव्याप्तिवारणायेन्द्रियत्वनिवेशः। सा च हृत्कण्ठजिह्वामूलतालुदन्तोष्ठनासामूर्धरूपस्थानाष्टकवृत्तिः। शुकादिव्यतिरिक्तविहङ्गादीनामुक्तेन्द्रियसत्त्वेऽप्यदृष्टसंस्थानादिसहकारिविरहाद्वर्णाद्यनुत्पत्तिः। शुकादीनामपि किञ्चित्तादृशसंस्थानवैषम्यादुच्चारणवैषम्यम्॥

आस्यकवलसंयोगोद्देश्यककृतिप्रयोज्यव्यापारवदिन्द्रियं–**पाणिः**। भौतिकहस्तादावतिव्याप्तिवारणायेन्द्रियमिति। विलेखनसाधनेन्द्रियं वा सः; विलेखनं च पत्राद्यिगतावयवविभागमप्यादिसंयोगान्यतरानुकूलव्यापारः। तथा चावयवविभागमप्यादिसंयोगान्यतरोद्देश्यककृतिजन्यव्यापारवदिन्द्रियं पाणिरिति फलितम्। स च मनुष्यादीनां अङ्गुल्यग्रवृत्तिः, गजादीनां नासाग्रवृत्तिः। न च–अभ्यासपाटवात्पादादिभिरपि केषां चिद्विलेखनस्य जायमानत्वात्पादादावतिव्याप्तिरिति–वाच्यम्। तत्राप्यल्पीयस्याः हस्तादिवृत्तेः प्रसरणाङ्गीकारेण तादृशवृत्त्यैव लेखनाद्युत्पत्तेः॥

उत्तरदेशसंयोगोद्देश्यककृतिजन्यव्यापारवदिन्द्रियं–**पादः**। भौतिकपादवारणायेन्द्रियमिति। स च मनुष्यादीनां चरणवृत्तिः भुजगपतगादीनां उरःपक्षादिवृत्तिः॥

मलादिपतनोद्देश्यककृतिजन्यव्यापारवदिन्द्रियं–**पायुः**। स च तत्तदवयवविशेषवृत्तिः॥

आनन्दविशेषोद्देश्यककृतिजन्यव्यापारवदिन्द्रियं–**उपस्थः**। स च मेहनादिवृत्तिः॥

उक्तानामिन्द्रियाणां मुक्तिदशायामप्राकृतदेशगमनासम्भवादिहैव यावत्प्रलयं स्थितिः करणविधुरैरन्यैः परिग्रहो वा बोध्यः॥

अत्र नैयायिकाः—

कर्मेन्द्रियाणामिन्द्रियत्वमेवासिद्धं, प्रमाणाभावात्। ज्ञानेन्द्रियेषु च श्रोत्रस्याकाशत्वं, स्पर्शनस्य वायुत्वं, नयनस्य तेजस्त्वं, रसनस्य जलत्वं, घ्राणस्य च पृथिवीत्वं युक्तम्। तथा हि–श्रोत्रं स्वग्राह्यगुणसजातीयगुणवत्, बाह्येन्द्रियत्वात्, चक्षुरादिवत्; स्पर्शनं वायवीयं, रूपाग्राहकत्वे सति स्पर्शग्राहकत्वात्, अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत्; चक्षुस्तैजसं, स्पर्शाग्राहकत्वे सति रूपग्राहकत्वात्,

प्रदीपप्रभावत् ; रसनं जलीयं, रूपाग्राहकत्वे सति रसग्राहकत्वात्, सक्तुरसाभिव्यञ्जकनवशरावोदकवत् ; घ्राणं पार्थिवं, रसाग्राहकत्वे सति गन्धग्राहकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत—इत्याद्यनुमानैश्श्रोत्रादीनामाकाशत्वादिकं सिध्यति—इत्याहुः ॥

तन्न । 'एका कन्या दशेन्द्रियाणि दशेमे पुरुषे प्राणा आत्मैकादशः' इति श्रुत्या, 'इन्द्रियाणि दशैकं च देवा वैकारिका दश । एकादशं मनश्च' इत्यादिस्मृत्या च हस्तादीनामपीन्द्रियत्वावगमात् । श्रुतौ कन्यापदमात्मपदं च मनःपरं, श्रुतौ प्राणपदं स्मृतौ देवपदं चेन्द्रियपरं बोध्यम् । श्रोत्रादीनामनुमानैराकाशत्वादिसाधनमप्ययुक्तम् । तत्र श्रोत्रादिशब्दैः प्रत्यक्षग्राह्यकर्णशष्कुल्यादिरूपाधिष्ठानानां ग्रहणे बाधः । स्वमते तेषामाकाशत्ववायुत्वादेरनङ्गीकारात् तत्तदधिष्ठानकेन्द्रियाणां चाकाशादिरूपाणामनुमानात्पूर्वमसिद्धा उक्तानुमानेषु पक्षत्वासम्भवात् । न च—शब्दग्राहकेन्द्रियत्वस्पर्शग्राहकेन्द्रियत्वादिना पक्षीकरणात् न दोष इति- वाच्यम् । प्रथमानुमाने स्वग्राह्यगुणसजातीयगुणाभाववति हस्तादौ बाह्येन्द्रियत्वस्य हेतोर्व्यभिचारात्, मनोभिन्नज्ञानेन्द्रियत्वस्य हेतुत्वेऽपि दृष्टान्तस्य साध्यविकलत्वात्, चक्षुरादौ स्वग्राह्यरूपादिमत्त्वस्यास्माभिरनङ्गीकारात् । द्वितीयतृतीयानुमानयोरपि दृष्टान्तस्साधनविकलः, व्यजनपवनस्य वेगेन शरीरोपरि निपततस्तत्संयुक्तसूक्ष्मसलिलकणानां शरीरान्तःप्रवेशहेतुत्वेऽपि स्पर्शग्राहकत्वाभावात्, प्रविष्टानां च सलिलानां शैत्यस्यान्तर्गतत्वगिन्द्रियप्रदेशेन स्फुटमवगमात् ; विषयतासम्बन्धेन चाक्षुष प्रति संयोगादिसम्बन्धेन तमसःप्रतिबन्धकतया दीपप्रभायास्तादृशतमोनिवर्तकत्वेन चाक्षुषप्रयोजकत्वेऽप्यालोकसंयोगत्वादिना चाक्षुषहेतुत्वे मानाभावात्, प्रभायाः रूपग्राहकत्वाभावात्। किञ्च द्रव्यचाक्षुषे आलोकप्रतियोगिकसंयोगो न हेतुः ; मणि-

प्रभादौ तदभावेऽपि चाक्षुषोत्पत्तेः ; नाप्यालोकानुयोगिकः, घटादौ तदभावात् ; नाप्यालोकप्रतियोगिकत्वतदनुयोगिकत्वान्यतरविशिष्टसंयोगः, आलोकप्रतियोगिकत्वतदनुयोगिकत्वादीनां विशेषणविशेष्यभावे विनिगमनाविरहेण तदवच्छिन्नस्य कारणतावाहुल्यापत्तेः ॥ न च–अन्यदेशावच्छिन्नादप्यालोकसंयोगाच्चाक्षुषोत्पत्त्यभावाज्जातिविशेषस्यैव द्रव्यादिचाक्षुषजनकतायामालोकसंयोगनिष्ठायामवच्छेदकत्वं स्वीकार्यम् ; सा च–जातिरालोकनिष्ठे वाय्वादिसंयोगेऽपि सम्भवति । अत एव प्रभादि चाक्षुषमिति–वाच्यम्। तादृशजातिरालोकसंयोगे तत्समानाधिकरणतत्समानकालीनवायुसंयोगादौ वेत्यत्र विनिगमकाभावात्। किन्तु तमस्त्वेन प्रतिबन्धकत्वमेव द्रव्यचाक्षुषे कल्प्यते, तदभावादेवोक्तप्रभादौ चाक्षुषोपपत्तिः ॥ न च–तमोऽभावत्वेन हेतुत्वेऽपि तमःप्रतियोगिकत्वाभावत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण कारणताद्वयापत्तिरिति–वाच्यम् । स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तमस्त्वविशिष्टत्वेनैव कारणतास्वीकारेण कारणतावच्छेदके अभावत्वानिवेशात् ॥ न च–अत्रापि प्रतियोगितासम्बन्धेनालोकविशिष्टत्वेनहेतुतास्वीकारान्न विनिगमनाविरह इति–वाच्यम् ; मणिप्रभादौ व्यभिचारावारणात्॥ एतेन–संयोगेनालोकस्य हेतुत्वमित्यपि–निरस्तम् ॥

उक्तं च प्रथमसूत्रभाष्ये—

"प्रदीपप्रभायास्तु चक्षुरिन्द्रियस्य ज्ञानमुत्पादयतो विरोधितमोनिरसनद्वारेणोपकारकत्वमात्रमेव ॥" —इति ॥

न च–यथाकथञ्चिच्चाक्षुषप्रयोजकत्वस्य हेतुत्वात्तस्य प्रभायां सत्त्वान्न साधनवैकल्यमिति–वाच्यम्; तादृशप्रयोजकत्वस्योन्मीलनादिहेतुभूतपक्षादिसाधारण्येन व्यभिचारात् । एवमुक्तानुमानानां–इन्द्रियाण्यभौतिकानि, इन्द्रियत्वात्, मनोवत् –इत्यादिभिस्सत्प्रतिपक्षितत्वा-

दाहङ्कारिकत्वप्रतिपादकश्रुत्यादिबाधितत्वाच्च न भौतिकत्वमिन्द्रियाणामिति। न च–'अकाशमिन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ लीयन्ते' इतिश्रुत्या इन्द्रियाणां तन्मात्रेषु लयप्रतिपादनात्तन्निष्ठलयप्रतियोगित्वस्य तदुपादानकत्वव्याप्यत्वात्तन्मात्रोपादानकत्वसिद्ध्या भौतिकत्वं सिध्यतीति–वाच्यम्; इन्द्रियपर्याये आकाशपर्याये च लीयन्त इति पदाश्रवणेन तत्पर्यायद्वयस्याकाशेन्द्रिययोः इन्द्रियतन्मात्रयोश्च परस्परसंयोगप्रतिपादनपरत्वात्॥ न चेन्द्रियपर्याये लीयन्त इति पदानुषङ्गः, सति गत्यन्तरे अध्याहारवत्तस्याप्ययोगात्; अन्यथा आकाशपर्यायेऽप्यवैरूप्यायानुषङ्गापत्त्या सर्वोपबृंहणविरोधापत्तेः। इन्द्रियाणामाकाशोपादानत्वस्य कुत्राप्यकथनात्। अस्याश्चोपनिषदि भूतादेराकाशमाकाशाद्वायुरिति सृष्टिक्रमेण भूतादेरेवाकाशोपादानत्वाभिधानात्॥ न च–उक्तपर्यायद्वयस्याकाशेन्द्रिययोस्संसर्गप्रतिपादनपरत्वमपि न सम्भवति, तादृशसंसर्गस्येदानीमपि सत्त्वेन तत्प्रतिपादने प्रयोजनाभावादिति–वाच्यम्; स्पर्शनचक्षुरादिष्विन्द्रियेष्वाप्यायकानां वायुतेजःप्रभृतिभागानां सत्त्वात् तत्तदिन्द्रियाप्यायकत्वस्य तत्तदिन्द्रियैकसङ्घाततापत्तिरूपत्वात्तादृशभूतांशानां सर्वेषामपि तद्दशायामाकाशतापत्त्या इन्द्रियत्वावच्छेदेनाकाशत्वावच्छिन्नप्रतियोगिकविलक्षणसंयोगस्य प्रलयदशायामेव सम्भवात्। ततस्तादृशाकाशस्य शब्दतन्मात्ररूपताप्राप्तौ तन्मात्रत्वावच्छिन्ने इन्द्रियसंयोगस्योपपत्तेः। शब्दतन्मात्रस्यैकत्वेऽप्यंशभेदविवक्षया बहुवचनोपपत्तेः। तन्मात्राणि भूतादौ लीयन्त इत्यनेन शब्दतन्मात्रस्य तामसाहङ्कारे भूतादिपदवाच्ये लयप्रतिपादनेन विरोधाभावादिति॥

अथ तन्मात्रादिकं निरूप्यते। तन्मात्रभूतोभयसाधारणं लक्षणं तु शब्दवत्त्वम्, शब्दतन्मात्रादिपञ्चतन्मात्रेषु पञ्चमहाभूतेषु च तत्सत्त्वाल्लक्षणसङ्गतिः। स्वसमानाधिकरणस्वसजातीयगुणध्वंसासमानकालीन-

गुणवत्त्वं पञ्चतन्मात्राणां लक्षणम्। साजात्यं चाद्रव्यविभाजकशब्दत्व-स्पर्शत्वादिना। शब्दतन्मात्रे पूर्वं शब्दविरहेऽपि भगवत्सङ्कल्पेन शब्दोत्पत्त्या तादृशशब्दस्य स्वसमानाधिकरणशब्दध्वंससमानकाली-नत्वाल्लक्षणसमन्वयः॥ एवं स्पर्शतन्मात्रे स्पर्शं रूपतन्मात्रादौ रूपादिकं चादाय लक्षणसमन्वयो बोध्यः। अत्र शब्दादिमत्त्वस्याकाशादिभूते सत्त्वादतिव्याप्तिवारणायासमानकालीनान्तगुणविशेषणं, आकाशादौ तन्माञ्चादिनिष्ठसूक्ष्मशब्दादिनाशपूर्वकं स्थूलशब्दाद्युत्पत्तेस्तादृशस्थूल-शब्दस्य च स्वसमानाधिकरणस्वसजातीयसूक्ष्मशब्दध्वंससमानकालो-नत्वान्नातिव्याप्तिः। स्थूलसूक्ष्मगुणभेदादेव भूततन्मात्रयोर्भेदात्॥

उक्तं च **तत्त्वमुक्ताकलापे**—

"सूक्ष्मस्थूलस्वभावस्वगुणसमुदयप्रक्रियातारतम्यात्
तन्मात्राभूतभेदः कलिलदधिनयात्कल्पितस्तत्त्वविद्भिः।"
—इति॥

स्वगुणाः—शब्दादयः, तेषां, समुदयः—उत्पत्तिः। अत्र शब्दादौ स्थूलत्वसूक्ष्मत्वे उद्भूतत्वानुद्भूतत्वरूपे॥

उक्तं च **सर्वार्थसिद्धौ**—

"आगमेन विना सिद्धिस्तन्मात्राणां च दुर्वचा।
उद्भवानुद्भवाद्यैस्तु लोके सूक्ष्मादिकल्पना॥" —इति॥

स्पर्शतन्मात्रादिषु स्पर्शादेरपि घटादिनिष्ठस्पर्शध्वंससमानकालीनत्वा-दसम्भव इति तद्वारणाय स्वसमानाधिकरणत्वं गुणविशेषणम्। तादृश-स्पर्शादेः स्वसमानाधिकरणसंयोगादिध्वंससमानकालीनत्वात्तद्दोषताद-वस्थ्यवारणाय स्वसजातीयेति॥ न च—शब्दतन्मात्रेऽव्याप्तिः, तत्र शब्दस्य यावद्द्रव्यभाविन एकस्यासम्भवात् द्वितीयादिशब्दानां प्रथम-शब्दध्वंससमानकालीनत्वेन तदसमानकालीनशब्दवत्त्वाभावादिति—

वाच्यम्। सोऽयं ककार इत्यादिप्रत्यभिज्ञाबलेन सिद्धान्तिभिरपि शब्दस्य यावद्द्रव्यभावित्वाभ्युपगमात् । उक्तं च **न्यायसिद्धाञ्जने**—

"आकाशनिष्ठस्य शब्दस्याकाशेन सहोत्पत्तिविनाशौ, वाय्वादिनिष्ठस्यापि तत्तद्भूतैस्सह ॥" —इति ॥

स्वसमानाधिकरणस्वसजातीयगुणे स्वपूर्वप्रलयपूर्वत्वाभाववत्त्वं विशेषणं देयम् । तेन पूर्वसृष्टौ तादृशतन्मात्रत्वाद्याश्रयप्रकृत्यंशेषु स्पर्शादेस्सत्त्वेन तद्ध्वंसमानकालीनत्वस्यैतत्सृष्टिघटकतन्मात्रनिष्ठस्पर्शादिषु सत्त्वेऽपि न क्षतिः ॥

स्वपूर्वावस्थापूर्वत्वाभाववत्त्वस्वपूर्वत्वोभयसम्बन्धेन भूतत्वावस्थाविशिष्टावस्थावत्त्वं वा तल्लक्षणं, भूतत्वविशिष्टघटत्वावस्थामादाय घटादावतिव्याप्तिवारणाय स्वपूर्वत्वनिवेशः। भूतत्वविशिष्टाहङ्कारत्वादिकमादाय तत्रातिव्याप्तिवारणाय स्वपूर्वावस्थापूर्वत्वाभावनिवेशः । तत्र प्राकृताप्राकृतविभागः पूर्ववत् ॥

तानि च तन्मात्राणि पञ्च–शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रगन्धतन्मात्रभेदात् ॥

तत्र स्पर्शशून्यत्वे सति तन्मात्रत्वं–**शब्दतन्मात्रलक्षणं**। स्पर्शतन्मात्रादिवारणाय सत्यन्तं, अव्यक्तादिवारणाय विशेष्यम् ॥ रूपशून्यत्वे सति स्पर्शवत्तन्मात्रत्वं–**स्पर्शतन्मात्रलक्षणम्**। रूपतन्मात्रादिवारणाय सत्यन्तं, शब्दतन्मात्रवारणाय स्पर्शवदिति, वायुवारणाय तन्मात्रत्वमिति॥ रसशून्यत्वे सति रूपवत्तन्मात्रत्वं–**रूपतन्मात्रलक्षणं**। रसतन्मात्रादिवारणाय सत्यन्तं, शब्दतन्मात्रादिवारणाय रूपवदिति, तेजस्यतिव्याप्तिवारणाय तन्मात्रत्वनिवेशः ॥ एवं गन्धशून्यत्वे सति रसवत्तन्मात्रत्वं–**रसतन्मात्रस्य लक्षणं**, व्यावृत्तिः पूर्ववत् । गन्धवत्तन्मात्रत्वं च **गन्धतन्मात्रलक्षणमिति** बोध्यम् ॥

यद्वा—तामसाहङ्कारत्वावस्थाध्वंसरूपाकाशत्वावस्थाप्रागभावरूपावस्थावत्त्वं—शब्दतन्मात्रलक्षणं, आकाशत्वावस्थाध्वंसरूपवायुत्वावस्थाप्रागभावरूपावस्थावत्त्वं स्पर्शतन्मात्रलक्षणं, वायुत्वध्वंसरूपतेजस्त्वप्रागभावरूपावस्थावत्त्वं रूपतन्मात्रलक्षणं—**इत्यादिरीत्या ज्ञेयम्**। तामासाहङ्कारात् शब्दतन्मात्रस्य तस्मादाकाशस्य, आकाशात् स्पर्शतन्मत्रस्य तस्माद्वायोः, वायोश्च रूपतन्मात्रस्य तस्मात्तेजसः, तेजसो रसतन्मात्रस्य तस्माज्जलस्य, जलाद्गन्धतन्मात्रस्य तस्मात्पृथिव्याश्चोत्पत्तेरुक्तलक्षणानां सङ्गतिः ॥

यत्तु—तामसाहङ्कारात्पञ्चतन्मात्राणामुत्पत्तिः, तेभ्यश्चाकाशादिपञ्चभूतोत्पत्तिः। अत एव तन्मात्राणि भूतादौ लीयन्त इति बहुवचनं स्वरसतस्सङ्गच्छते—**इति**। **तन्न**। तथा सति 'आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी' इति श्रुति विरोधापत्तेः। तन्मात्राणि भूतादाविति श्रुतेः शब्दतन्मात्रमात्रलयप्रतिपादकत्वेन सकलतन्मात्राणां भूतादौ लयप्रतिपादकत्वविरहात्; अदितिः पाशानितिवद्बहुवचनोपपत्तेः। अन्यथा—'पृथिव्यप्सु प्रलीयते, आपस्तेजसि लीयन्ते', इत्यादिपूर्ववाक्यविरोधापत्तेः ॥ **न च**—आकाशसहकृतस्पर्शतन्मात्रस्य वायुजनकत्वमितिरीत्या पूर्वपूर्वभूतसहकृतस्य तन्मात्रस्योत्तरोत्तरभूतजनकत्वस्वीकारादाकाशस्य वायुं प्रति निमित्तत्वात्तत्परा आकाशाद्वायुरित्यादिश्रुतिः। अन्यथा 'अष्टौ प्रकृतयष्षोडश विकाराः' इति **आथर्वण**श्रुतिविरोधापत्तेः। तच्छ्रुतौ प्रकृतिमहदहङ्कारतन्मात्राणां प्रकृतित्वस्यैकादशेन्द्रियपञ्चभूतानां च विकृतित्वस्याभिधानात्; आकाशादीनां चतुर्णां तन्मात्रद्वारेण तत्त्वान्तरोत्पादकत्वे तेषामपि प्रकृतित्वापत्त्या द्वादशप्रकृतीनां द्वादशविकृतीनां चापत्तेः—इति **वाच्यम्**। तथा सति पृथिव्यप्सु प्रलीयत इत्यादिश्रुतिविरोधापत्तेः।

आकाद्वायुरित्यादेरुपादानपरत्वस्य 'पृथिव्या ओषधयः ओषधीभ्यो-ऽन्नम्' इत्याद्युत्तरवाक्यानुरोधेनाङ्गीकार्यत्वात् ॥

"भूतादिस्तु विकुर्वाणश्शब्दमात्रं ससर्ज ह ।
ततस्ससर्ज तन्मात्रमाकाशं शब्दलक्षणम् ॥
आकाशस्तु विकुर्वाणः स्पर्शमात्रं ससर्ज ह ।
बलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः ॥
ततो वायुर्विकुर्वाणो रूपमात्रं ससर्ज ह ॥"

इत्यादि विष्णुपुराणवचनेष्वप्युपादानताया उक्तत्वाच्च । अष्टौ प्रकृतयष्षोडशविकाराश्शरीर इत्यादिश्रुतिर्न हि चतुर्विंशतितत्त्वानां प्रकृतिभावेन भेदप्रतिपादनपरा ; किन्तु अव्यक्तमहदहङ्कारपञ्चमहाभूतरूपाष्टद्रव्याणां शरीरारम्भकत्वेन प्रकृतित्वं, शब्दादिपञ्चविषयैकादशेन्द्रियाणां शरीराश्रितत्वेन विकारत्वमित्येवम्परा। स्फुटं चेदं **श्रीगीताभाष्ये** ॥ अष्टौ प्रकृतय इत्यत्र प्रकृतित्वं च न तावद्यत्किञ्चित्कार्योपादनत्वं, पृथिव्या अपि घटाद्युपादानत्वादिन्द्रियाणामपि वृत्त्युपादानत्वात् प्रकृतित्वापत्तेः। नापि प्रकृतिविभाजकोपाधिरूपेण स्वविजातीयकार्योपादानत्वं तत्, आकाशत्वादीनां भूतविभाजकत्वेन प्रकृतिविभाजकत्वाभावेन तेन रूपेण विजातीयकार्यजनकत्वस्य तन्मात्रेष्वभावेन तेषां प्रकृतित्वानापत्तेः ; किन्तु–भूतविभाजकोपाधिमहदहङ्कारशब्दतन्मात्रत्वान्यतमरूपेण विजातीयकार्यजनकत्वं तथेतिवाच्यम्। तदस्माकमपि तन्मात्रसाधारणमाकाशादिव्यावृत्तं चेति नोक्तश्रुतिविरोधः ॥

तत्र स्पर्शरहितत्वे सति उद्भूतशब्दवान्–**आकाशः**। वाय्वादिवारणाय सत्यन्तं ; अव्यक्तादिवारणाय विशेष्यं ; शब्दनन्मात्रवारणायोद्भूतेति-श्रोत्राप्यायकत्वं वा तल्लक्षणम्। श्रोत्राप्यायकत्वं च श्रोत्रेण सहैकसङ्घातनापन्नत्वम्। न च–श्रोत्रानाप्यायकभागेष्वव्याप्तिः; श्रोत्राप्यायक

त्वसमानाधिकरणभूतविभाजकोपाधिमत्त्वस्य तदर्थत्वात् ॥ न च–स्पर्शवद्वृत्त्याद्यप्रतिबन्धरूपावकाशात्मककार्यसिद्ध्यर्थमेवाकाशोऽङ्गीकार्यः, तथा शास्त्रसिद्धत्वात्; तथाचाकाशरूपपरिणामरहितप्रकृतिप्रदेशेऽपि गतिनिरोधप्रसङ्गः, स्पर्शशून्यद्रव्यत्वेनैवावकाशहेतुत्वस्वीकारात्प्रकृत्यादीनामपि तथात्वे चाकाशकल्पनं व्यर्थमिति–वाच्यम् । यत आकाशस्यावकाशरूपकार्यनिर्वाहार्थमेव न स्वीकारः, किन्तु श्रुतिसिद्धत्वात्प्रत्यक्षसिद्धत्वाच्च; आकाशोऽयं, कूपोऽयं, रन्ध्रमिदम्, इह पतङ्गः पतति–इत्यादिचाक्षुषप्रत्यक्षस्याकाशेऽपि सत्त्वात् । न च–इह पतङ्ग इति प्रत्यक्षे आलोकस्याधिकरणतया भानं; नाकाशस्येति–वाच्यम्; इहालोक इति प्रत्यक्षे तदसम्भवात्, आलोकावयवस्य तदधिकरणतया भानोपगमेऽपि त्र्यणुकाद्यात्मकालोकविषयकतादृशप्रत्यक्षे तदवयवस्य द्व्यणुकस्याप्रत्यक्षत्वेनाधिकरणतया भानासम्भवात् ॥ न च–सभायां ब्राह्मणा इतिवदिह त्र्यणुकमिति प्रत्यक्षे त्र्यणुकसमुदायस्याधिकरणतया भानसम्भव इति–वाच्यम्; एवमपि–नभसि त्र्यणुकं, व्योम्न्यातप इत्यादिप्रत्यक्षे त्र्यणुकसमुदायस्याधिकरणतया भानासम्भवात्, तस्य नभोव्योमादिशब्दार्थत्वासम्भवात्, आकाशस्याप्रत्यक्षत्वे नीलं नभ इति प्रत्यक्षानुपपत्तेश्च ॥ न च–उपनीतस्य नीलादेरुपनीते आकाशे आरोपः आकाशस्याप्रत्यक्षत्वेऽप्युपपद्यत इति–वाच्यम् । उपनीतं विशेषणतयैव भासत इति नियमेन चाक्षुषे नीलं नभ इति प्रत्यक्षे आकाशस्य विशेष्यतया भानासम्भवात्, स्वाश्रयग्यविशेष्यकज्ञानजनने इन्द्रियाणामसामर्थ्यात् । स्पष्टञ्चेदं पञ्चतायां ॥

मानसत्वं तु तादृशप्रतीतेर्वक्तुमशक्यं; निर्मीलितनयनस्यापि तदापत्तेः, नीलं नभश्चक्षुषा साक्षात्करोमीत्यादिप्रतीत्यनुपपत्तेश्च । न च–द्रव्यनिष्ठविषयतासम्बन्धेन चाक्षुषप्रत्यक्षं प्रति समवायेन रूपस्य कारणतया आकाशे च रूपाभावान्न चाक्षुषसम्भव इति–वाच्यम्;

कालस्य पडिन्द्रियवेद्यताया वक्ष्यमाणत्वेन तच्चाक्षुषे व्यभिचारेण उक्त-कारणत्वासम्भवात्। न चैवं—प्रकृतिमहदहङ्काराणां वाय्वीश्वरयोश्च चाक्षुषप्रसङ्ग इति—वाच्यम्; सामानाधिकरण्येन कालाकाशान्यत्व-विशिष्टो य उद्भूतरूपाभावस्तदभावत्वेन द्रव्यचाक्षुषं प्रति हेतुतास्वी-कारात्, कालाकाशयोर्विशेषणाभावेन पृथिव्यादौ च विशेष्याभावेनोक्त-विशिष्टान्यत्वसम्भवात्, प्रकृत्यादौ चोक्तयोर्विशेषणविशेष्ययोर्द्वयोरेव सत्त्वेन विशिष्टाभावविरहात्॥

वस्तुतस्तु—चाक्षुषं प्रत्युद्भूतरूपस्य नोद्भूतरूपत्वेन कारणता, किन्तु शक्तिमत्त्वेन; तत्रोद्भूतरूपे कालाकाशत्वयोश्चैकस्या एव शक्तिस्वी-कारात् कालाकाशयोश्चाक्षुषोपपत्तिः; प्रकृत्यादौ तदनापत्तिश्च। अद्रव्येपि शक्तिसद्भावो वक्ष्यते॥

यत्तु—भाष्ये पञ्चीकरणप्रक्रियया रूपवत्त्वादाकाशस्य चाक्षुषत्वमुप-पद्यत इत्युक्तम्। **तत्तु**—वैभववादमात्रमित्युक्तं **सर्वार्थसिद्धौ**। तथा रूपा-ङ्गीकारे आकाशस्याष्टमांश एव रूपसत्त्वेन तादृशभागस्य चाक्षुषोपपा-दनेऽपि भागान्तरे तदुपपादनासम्भवात्, कालस्य सुतरां तदसम्भवात्॥ यदपि—न चक्षुषा सन्मात्रं गृह्यते, तस्य रूपरूपिरूपैकार्थसमवेतपदार्थ-ग्राहित्वादिति भाष्यम्, तदपि—न चाक्षुषसामान्ये रूपकारणताप्रद-र्शनपरं, किन्तु द्रव्यचाक्षुषस्य रूपप्रकारकत्वनियमपरमिति बोध्यम्॥

अत्र नैयायिकाः—आकाशं नित्यं, निरवयवद्रव्यत्वात्, महाकाल-वत्—इत्याद्यनुमानेनाकाशस्य नित्यत्वं सिध्यतीति। **तन्न**; 'आत्मन आकाशस्सम्भूतः' इति श्रुतिबाधितत्वात्तदनुमानस्य। किञ्च—नित्यत्वं ध्वंसाप्रतियोगित्वं प्रागभावाप्रतियोगित्वं, कालनिष्ठभेदप्रतियोगितानव च्छेदकत्वं वा? सर्वत्र सिद्धसाधनं दुर्वारम्। आकाशत्वरूपावस्थायां ध्वंसप्रतियोगित्वादिसत्त्वेऽपि तदाश्रयद्रव्ये तदभावस्याक्षतत्वात्, द्रव्यस्य कालनिष्ठभेदप्रतियोगितानवच्छेदकत्वाच्च। न च—आकाश-

लयोक्तया आकाशो नष्ट इत्यादिप्रतीतेर्भवन्मते प्रमात्वात् आकाशत्वविशिष्टेऽपि ध्वंसप्रतियोगित्वादिकं स्वीकार्यमिति—वाच्यम्; तादृशप्रतियोगिताया विशिष्ट एव पर्याप्ततया द्रव्यस्वरूपे तदपर्याप्तेस्तस्य नित्यत्वानपायात्। न च—आकाशत्वं कालनिष्ठभेदप्रतियोगितावच्छेदकतानवच्छेदकं, निरवयवद्रव्यवृत्तित्वादित्यत्र तात्पर्यान्न सिद्धसाधनता, आकाशत्वावच्छिन्नावच्छेदकताभेदस्य प्रलये सिद्धान्तिभिरुपगमादिति—वाच्यम्। तथाऽपि निरवयवद्रव्यवृत्तित्वस्यासमवेतद्रव्यवृत्तित्वरूपत्वे घटत्वादौ व्यभिचारात् घटादेरपि सिद्धान्ते असमवेतत्वात्, समवायानङ्गीकारेण हेत्वप्रसिद्धेश्चेति॥

आकाशात् स्पर्शतन्मात्रं, ततो वायुः। रूपशून्यत्वे सत्युद्भूतस्पर्शवत्त्वं तल्लक्षणं। तेजोजलादिवारणाय सत्यन्तम्, आकाशवारणाय विशेष्यं, स्पर्शतन्मात्रवारणायोद्भूतेति। गन्धशून्यत्वे सत्यनुष्णाशीतस्पर्शवत्त्वं च तल्लक्षणं; पृथिवीवारणाय सत्यन्तं, जलतेजसोर्वारणायानुष्णाशीतेति। तन्मात्रवारणायोद्भूतत्वमपि निवेश्यम्॥ न च—सुरभिर्वायुरिति प्रतीतेर्गन्धशून्यत्वं वायावसिद्धम्, एवं शीतो वायुरुष्णो वायुरिति प्रतीतेश्चानुष्णाशीतस्पर्शवत्त्वमप्यसिद्धमिति—वाच्यम्; कुसुमादिगन्धस्य स्वाश्रयसंयोगादिसम्बन्धेन वायुसम्बद्धस्य तत्र साक्षात्सम्बन्धेनारोपात् जलातपगतयोरेव शीतोष्णस्पर्शयोस्तत्रारोपात्, चाक्षुषाविषयत्वे सति स्पार्शनप्रत्यक्षविषयद्रव्यत्वं च लक्षणम्। रूपशून्यत्वेऽपि वायोः स्पार्शनं सम्भवत्येव; द्रव्यनिष्ठविषयतासम्बन्धेन स्पार्शनं प्रति स्पर्शस्यैव हेतुत्वात्॥ बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति रूपस्य कारणत्वमिति तु न युक्तं; मानाभावात्। उक्तं च श्रीभाष्ये—"स्पार्शनमपि न सन्मात्रविषयं, स्पर्शतद्विषयत्वात्" इति। कालान्यत्वविशिष्टोद्भूतस्पर्शाभावाभावत्वेन हेतुत्वात् कालत्वस्पर्शयोरेकशक्तिमत्त्वेन हेतुत्वाद्वा कालस्य

स्पार्शनोपपत्तिः। अयं च समीपस्थेन स्पर्शनेन्द्रियग्राह्यः ; दूरस्थितेन तु तृणरजःप्रभृतीनां भ्रमणोर्ध्वगमनादिभिरनुमेयः। अस्य चादृष्टात्मकेश्वरसङ्कल्पात्तिर्यग्गमनं स्वाभाविकं, पार्थिवादिद्रव्येण वाय्वन्तरेण वाऽभिघातादिवशात् भ्रमणोर्ध्वगमनादयः॥

स चायं वायुः—इन्द्रियाप्यायकप्राणशरीरविषयभेदाच्चतुर्धा। तत्त्वगिन्द्रियेणैकसङ्घाततापन्ना वाय्वंशा इन्द्रियाप्यायकाः ; शरीरधारणादिहेतुर्वायुविशेषः प्राणः। स चैकोऽपि प्राणापानव्यानोदानसमानात्मकवृत्तिभेदात्पञ्चधा, नागकूर्मकृकरदेवदत्तधनञ्जयभेदैस्सह दशधा चोच्यते।

"प्राणोऽपानस्समानश्च उदानो व्यान एव च।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः॥
चरन्ति दशनाडीषु दश प्राणादिवायवः॥"

इत्यारभ्य,

"उद्गारादीनथो नागः कूर्मोऽक्ष्यादिनिमीलनम्।
कृकरश्चक्षुषः कर्ता दत्तो निद्रादिकर्मकृत्॥"

इत्यादि प्रमाणात्। जङ्गमशरीरवत् स्थावरशरीरेऽप्यसावस्त्येव। भग्नशाखादीनां संरोहणेन क्षतभागानां वृद्ध्या च वृक्षादौ प्राणसद्भावोन्नयनात्। परं तु स्थावरशरीरेष्वेकधैव वर्तते, न पञ्चधा॥ उक्तं च भाष्ये—

"स्थावरेषु हि प्राणसद्भावेऽपि हि तस्य पञ्चधाऽवस्थाय शरीर धारणत्वेनावस्थानं नास्ति॥" —इति॥

शरीरोपादानभूताद्वायोरन्य एव प्राणाख्यो वायुः, वायवीयं च शरीरं मारुतादीनां प्रसिद्धं, चण्डानिलतालवृन्तपवनादिर्विषयः॥

वायो रूपतन्मात्रं, ततस्तेजः; 'वायोरग्निः' इति श्रुतेः, अग्निशब्दस्य तेजस्सामान्यपरत्वात्॥ **ननु**—वायुपरिणामत्वरूपवायूपादान-

कत्वं तेजसो न सम्भवति, तृणपर्णकाष्ठादीनामेवपार्थिवानामग्न्यादि-रूपेण परिणामदर्शनात्॥ न च–तत्राप्यदृष्टाद्युपनीतैस्तेजोऽवयवैरेवाग्न्यारम्भ इति–वाच्यम्; कल्पनागौरवात्। एवं च वायोरग्निरिति श्रुतिर्निमित्तकारणत्वमात्रेणाप्युपपद्यते–इति चेन्न॥ तृणपर्णादावपि पञ्चीकरणादिना तेजोभागसत्त्वेन तस्यैव सजातीयावयवयोगेनोद्भूताग्न्यादिरूपेण परिणामोपपत्तेर्गौरवविरहात्, श्रुतेरनन्यथासिद्धोपादानप्रकरणपठिताया निमित्तकारणत्वपरत्वासम्भवात्। अन्यथा काष्ठादिजन्याग्न्यादौ पार्थिवोपादानकत्वं, अविन्धनाग्नौ च तदसम्भवाज्जलोपादानकत्वमिति कल्पने भवतामेवानेकोपादानकल्पनागौरवात्। काष्ठादावनुद्भूताग्निसत्त्वं च महर्षिभिरेवोक्तं—"काष्ठेऽग्निरिव शेरते।
दारुण्यग्निर्यथा तैलं तिले तद्वत्पुमानपि॥" —इति॥

तथा च–समष्टिसृष्टिदशायां वायोरेवोपादानभूताद्ब्रह्मेरुत्पत्तिः, व्यष्टिदशायां तु सूक्ष्मात्तेजस एव स्थूलतेजस उत्पत्तिरिति॥

उष्णस्पर्शवत्त्वं भास्वररूपवत्त्वं च तेजसो लक्षणं; रसशून्यत्वे सति रूपवत्त्वं च तल्लक्षणम्। तच्चतुर्धा–आप्यायकवैश्वानरशरीरविषयभेदात्। वाक्चक्षुषोराप्यायकं तेज इन्द्रियाप्यायकं; 'तेजोमयी वाक्', 'आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत्, रश्मिभिरेषोऽस्मिन् प्रतिष्ठितः' इति श्रुतेः। भुक्तान्नादेः परिणामहेतुस्तेजोविशेषो वैश्वानरः। आदित्यादिशरीरं तैजसशरीरं, 'सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणि' इत्यादिश्रुतिसिद्धम्। चन्द्रिकातपादिर्विषयः॥

तेजः पुनस्सामान्यतो द्विधा—प्रभा प्रभावांश्चेति। स्वापृथक्सिद्धत्वस्वाधिकपरिमाणवत्त्वोभयसम्बन्धेन तेजोविशिष्टं तेजः–प्रभा। अपृथक्सिद्धत्वं च–अपृथक्सिद्ध्यात्मकसंयोगप्रतियोगित्वं, गुणगुणिनोस्स्वरूपसम्बन्ध इव प्रभाप्रभावतोस्संयोगेऽप्यपृथक्सिद्धत्वस्य स्वा-

कारात्। 'सर्वं तं परादाद्योऽन्यत्रात्मनस्सर्वं वेद', 'न तदस्ति विना यत्स्यान्मया भूतं चराचरम्' इत्यादिना जगद्ब्रह्मणोस्संयोगे अपृथक्सिद्धित्वस्य प्रतिपन्नत्वेन तादृशधर्मस्य संयोगत्वविरुद्धत्वाभावात्। यद्वा—स्वापृथक्सिद्धत्वं स्वसंयोगाभावनिरूपितकालविशेषावच्छिन्नाधिकरणताशून्यत्वे सति स्वसंयोगवत्त्वम्। स्वापृथक्सिद्धत्वसम्बन्धेन प्रभाविशिष्टदीपकलिकादिवारणाय स्वाधिकपरिमाणवत्त्वनिवेशः। अल्पदीपाविशिष्टमहादीपवारणाय स्वापृथक्सिद्धत्वनिवेशः। स्वाधिकपरिमाणवत्त्वं च स्वासंयुक्तानेकदेशसंयुक्तत्वम्। तेन परिमाणानङ्गीकारेऽपि न क्षतिः। न च—आतपतप्तसलिलादौ रात्रावप्यौष्ण्योपलम्भादादित्यमुक्ताः किरणास्सलिलान्तःप्रविष्टास्सन्तीत्यभ्युपगन्तव्यं; तथा चादित्यापृथक्सिद्धत्वं किरणेषु नास्तीत्यव्याप्तिरिति—वाच्यम्। रविकिरणोपात्तमुक्तानां तुहिनाकरणानां संक्रमाच्छैत्योपलम्भवत्तत्किरणोपात्तमुक्तानामन्यवयवानां संक्रमात्सलिलादौ औष्ण्योपलम्भोपपत्तेः; तत्र किरणानां सद्भावस्याकल्पनात्। उक्तं च मात्स्ये—

"वसन्ते ग्रीष्मके रश्मिशतैस्सन्तपति त्रिभिः।
शरद्यपि च वर्षासु चतुर्भिस्सम्प्रवर्षति॥
हेमन्ते शिशिरे चैव हिममुत्सृजति त्रिभिः।" —इति॥

अत्र सन्तपतीत्यस्यान्यवयवानुत्सृजतीत्यर्थः। स्पष्टं चैतच्छ्रुतप्रकाशिकायां॥

यत्तु—विशीर्णदीपावयवसमुदाय एव प्रभेति। तन्न; ऊर्ध्वगमनस्वभावानां दीपावयवानां वाताद्यभिघातादर्शने युगपद्विप्वग्विशरणादिकल्पनस्य गुरुत्वात्, प्रभाया द्रव्यान्तरत्वे तु प्रत्यक्षाद्यनुरोधेन तथाऽभ्युपगमोपपत्तेः, मण्यादिप्रभाया विशीर्णतदवयवसमुदायत्वासम्भवाच्च। न च—मण्यादौ पार्थिवांशस्य स्थिरत्वेऽपि तदन्तर्गततेजोंशस्य विशरणप्रसरणादिकमुपपन्नमिति—वाच्यम्, कल्पनागौरवात्॥

तदतिरिक्तं तेजः प्रभावत्, तच्च मणिचुमणिप्रदीपादि। सुवर्णं तु पार्थिवमेव, पीतरूपवत्त्वात्, गुरुत्ववत्त्वात्, काठिन्यवत्त्वाच्च; 'काठिन्यवान्यो बिभर्ति' इत्यनेन पृथिव्या एव काठिन्योक्तेः। न च–सुवर्णं तैजसम्, अत्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात्, यन्नैवं तन्नैवमिति व्यतिरेक्यनुमानेन सुवर्णस्य तैजसत्वसिद्धिरिति–वाच्यम्। व्यतिरेक्यनुमानस्य निरसिष्यमाणत्वात्, द्रुतं द्रुततरं द्रुततममिति प्रतीत्या उच्छिद्यमानद्रवत्ववत्त्वेनानुच्छिद्यमानद्रवत्वासिद्धेः, पीतं द्रुतमिति प्रतीत्या पार्थिवभागेऽपि तादृशद्रवत्वदर्शनेन व्यभिचाराच्चेति। अत्र रक्तभास्वरमेव रूपं, रूपान्तरोपलम्भस्तु पृथिवीजलांशसंसर्गवशात्। एतच्च "यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्य" इत्यादि श्रुतिसिद्धम्। एवमुष्ण एव स्पर्शः, चन्द्रिकादौ शीतस्पर्शशुक्लरूपयोस्तदन्तर्गतजलांशसम्बन्धित्वात्, मरकतप्रभादावनुष्णाशीतनीलरूपयोश्च पार्थिवत्वादिति॥

तेजसो रसतन्मात्रं, तस्माज्जलम्। शीतस्पर्शवत्त्वं, निर्गन्धत्वे सति रसवत्त्वं, अपाकजशुक्लरूपवत्त्वं, सांसिद्धिकद्रवत्ववत्त्वमित्यादि--तल्लक्षणम्॥ न च–उष्णोदके शीतस्पर्शवत्त्वस्याव्याप्तिरिति–वाच्यम्; तत्रापि शीतस्पर्शसत्त्वात्, तेजस्स्पर्शेनाभिभवेन तदनुपलब्धेः। प्रथमं पृथिव्याः कृष्णाया एवोत्पत्तावपि पाकवशात्तत्र शुक्लरूपोत्पत्तेस्तत्वातिव्याप्तिवारणायापाकजेति॥ न च–सांसिद्धिकद्रवत्वस्य हिमकरकयोः अव्याप्तिरिति–वाच्यम्; तत्रापि द्रवत्वसत्त्वादुपष्टम्भकपार्थिवभागगतकाठिन्येनाभिभूतत्वादनुपलम्भोपपत्तेः। तच्चाप्यायकशरीरविषयभेदात्त्रिधा। तत्र रसनप्राणयोराप्यायका अंशा आप्यायकाः। शरीरं वरुणलोके। सरित्समुद्रादिर्विषयः—इति॥

जलाद्गन्धतन्मात्रं, तस्मात्पृथिवी। गन्धवत्त्वं तल्लक्षणम्। न च–तन्मात्रेऽतिव्याप्तिः, उद्भूतत्वनिवेशे च पाषाणेऽव्याप्तिरिति–वाच्यम्।

गन्धध्वंससमानाधिकरणगन्धवत्त्वस्य विवक्षितत्वात् । रसवत्त्वे सत्यनुष्णाशीतस्पर्शवत्त्वं, पाकजरूपवत्त्वमित्यादिकमपि तल्लक्षणम्। सा प्रथमं सुरभिमधुरकृष्णानुष्णाशीतस्पर्शा जाता । तत्रानुष्णाशीतस्पर्शो यावद्द्रव्यभावी ; तेजस्सलिलसम्पर्कादौष्ण्याद्युपलम्भः । कृष्णरूपं स्वाभाविकमिति च 'यत्कृष्णं तदन्नस्य' इति श्रुतिसिद्धम् । पाकवशाच्च रूपान्तरोत्पत्तिः । सा त्रिधा—आप्यायकशरीरविषयभेदात् । मनोघ्राणयोराप्यायकाः पार्थिवभागाः आप्यायकाः ; अस्मदादिशरीरं पार्थिवं ; विषयो मृत्पाषाणादिरिति ॥

तमो द्रव्यं, सङ्कोचविकासरूपावस्थावत्त्वात् क्रियावत्त्वाच्च ; पार्थिवं चाबाधितनीलादिप्रत्ययविषयत्वादिति—**वेदान्ताचार्याः** ॥ न च—तेजोऽभाव एव तमः, द्रव्यान्तरकल्पने गौरवादिति—वाच्यम् ; तथा सत्यबाधितनीलादिप्रत्ययानुपपत्तेः, 'तमस्ससर्ज भगवान्' इति तत्त्वान्तरवत्सृष्टिश्रवणानुपपत्तेः, 'नासीत्तमो ज्योतिरभून्न चान्यत्' इति तेजस्तमसोर्द्वयोरपि निषेधानुपपत्तेश्च, तयोर्भावाभावरूपत्वे एकदा निषेधासम्भवात् ; अन्तर्यामिब्राह्मणे यस्य तमश्शरीरमिति तमसश्शरीरत्वानुपपत्तेश्च शरीरत्वस्य वक्ष्यमाणरीत्या द्रव्यत्वघटितत्वात् । न च—तमसः पार्थिवत्वे पृथिवीतः पृथगेव सृष्ट्याद्यभिधानमनुपपन्नमिति—वाच्यम् ; पृथक्सृष्टिवचनस्य स्वर्गान्तरिक्षसृष्ट्यादिवदुपपत्तेः । न च—तमसो द्रव्यत्वे तमस्संयुक्तस्य तमसः चाक्षुषानुपपत्तिः ; द्रव्यनिष्ठलौकिकविषयतासम्बन्धेन चाक्षुषं प्रति संयोगेन तमसः प्रतिबन्धकत्वादिति—वाच्यम् ; तमो भिन्नद्रव्यनिष्ठविषयतासम्बन्धेन चाक्षुषं प्रत्येव तत्प्रतिबन्धकतास्वीकारात् ॥

व्यासाचार्यानुयायिनस्तु—तम आकाशं, गतिनिरोधकत्वाभावे सति चाक्षुषप्रत्यक्षविषयद्रव्यत्वात्, प्रसिद्धाकाशवत् ; पृथिव्यां व्यभिचारवारणाय सत्यन्तम्, आत्मनि व्यभिचारवारणाय चाक्षुषेति ।

प्रत्यक्षाविषयता च—मुख्यविशेष्यतारूपा ग्राह्या; तेन काले न व्यभिचारः। उक्तं च श्रुतप्रकाशिकायां—'स्वच्छद्रव्यत्वादाकाशकार्यं तमः' —इति॥ गतिनिरोधकत्वाभावे सति चाक्षुषविषयद्रव्यत्वमेव स्वच्छद्रव्यत्वं; यद्वा—स्पर्शशून्यत्वे सति चाक्षुषविषयद्रव्यत्वं तत्; तेन प्रभादौ न व्यभिचारः। न च तमस आकाशत्वे रूपवत्त्वानुपपत्तिः; पञ्चीकरणवशात्तदुपपत्तेः। अथवा तमस्तैजसं, रसशून्यत्वे सति रूपवत्त्वात्, वह्न्यादिवत्। न चैवमुष्णस्पर्शप्रत्यक्षापत्तिः; नीलमणिप्रभादाविव स्पर्शस्यानुद्भूतत्वकल्पनात्॥ उक्तं च श्रुतप्रकाशिकायां—"यद्वा तेजःकार्यं तमः, रूपवत्त्वात्; स्पर्शानुपलम्भस्तु स्वच्छद्रव्यत्वात्"—इति॥ स्वच्छत्वादित्यस्यानुद्भूतत्वादित्यर्थः॥ —इत्याहुः॥

अपरे तु—प्रकृतेरवस्थान्तरमेव तमः, न तावद्वायुपर्यन्तेषु तस्यान्तर्भावः, रूपवत्त्वात्; नापि जलतेजसोः, नीलरूपवत्त्वात्; नापि पृथिव्यां, गन्धरसादिरहितत्वात्। अत एवोक्तं **न्यायसिद्धाञ्जने**—

"अस्तु वा किञ्चिदभिनवघनाघनावलीमलीमसमनाघ्रातस्पर्शरसगन्धमन्धकाराभिधानमवस्थान्तरं प्रकृतेः॥" —इति॥

तत्त्वरत्नाकरेऽपि—

"अत्र तत्त्वविदः प्राहुस्स्थूलसूक्ष्मात्मना स्थिता।
दैवी गुणमयी माया बाह्यान्तरतमो मता॥" —इति॥

अत एव भाष्येऽप्यस्य द्रव्यत्वमेवोक्तं, पृथिव्यादिष्वन्तर्भावो नाभिहितः॥ —इत्याहुः॥

एवं चतुर्विंशतिविधा प्रकृतिर्निरूपिता॥

इदमत्र बोध्यम्—

न तावदव्यक्तादेः कारणत्वं, महदादेः कार्यत्वं; किन्तु तत्तच्छरीरकपरमात्मन एव कारणत्वं कार्यत्वं च। तथा च—आकाशाद्वायुरित्यादावाकाशशरीरकाद्वायुशरीरकपरमात्मोत्पन्न इत्यर्थः। अत एव

'तत्तेज ऐक्षत, बहुस्यां प्रजायेयेति, तदपोऽसृजत, ता आप ऐक्षन्त, बह्व्यः स्याम प्रजायेमहि'—इत्यादिच्छान्दोग्यश्रुतौ तेजश्शब्दवाच्ये अप्शब्दवाच्ये च बहुभवनसङ्कल्पादिकमुपपद्यते; तेज आदिशब्दस्याचेतनमात्रपरत्वे तादृशेक्षणानुपपत्तेः । ईक्षतिधातोर्गौणत्वं तु—**गौणश्चेन्नात्मशब्दादित्यत्रैव** निराकृतम्। न चैवं—'आत्मन आकाशस्सम्भूतः' इति श्रुतौ सम्भूतशब्दस्य गौण्यसम्भवादिति पूर्वपक्षसूत्रोक्तन्यायेन गौणत्वापत्तिः, आकाशस्योत्पत्तिमत्त्वेऽपि तच्छरीरकपरमात्मनस्तदसम्भवादिति—वाच्यम् ; स्वाधिकरणक्षणध्वंसानधिकरणक्षणसम्बन्धरूपोत्पत्तेः, विशेषण इव विशिष्टेऽप्यक्षतत्वात् । स्वाधिकरणक्षणध्वंसानधिकरणक्षणाप्रसिद्ध्या स्वपदेन केवलपरमात्मोपादानासम्भवेऽपि आकाशादिशरीरिकत्वविशिष्टपरमात्मन उपादानसम्भवात्, विशिष्टनिरूपिताधिकरणतावत्क्षणध्वंसानधिकरणत्वस्याकाशोत्पत्तिक्षणे प्रसिद्धेः । अत एवोक्तं **बौद्धाधिकारे शिरोमणिना**—

"आत्मनामुत्पत्त्यभावेऽपि विशेषणस्य शरीरस्य तथात्वाद्विशिष्टस्य तथात्वव्यपदेशः, अपूर्वशरीरादिसम्बन्धरूपं तु न मुख्यो जन्यर्थः ॥" —इति ॥

व्याख्यातं चात्र **गदाधरेण**—"विशेषणोत्पत्तिक्षणस्य विशेष्याधिकरणसमयध्वंसाधिकरणत्वेऽपि विशिष्टाधिकरणसमयध्वंसानधिकरणत्वरूपाद्यत्वाक्षतेः, तत्सम्बन्धरूपजननस्य विशिष्टेऽपि निर्वाहाच्चैत्रो जात इत्यगौणः प्रयोग उपपन्नः ; जात इत्यस्याद्यशरीरसम्बन्धवानित्याद्यर्थकत्वे च जात इत्यस्य लाक्षणिकत्वापत्तिः ॥" —इति ॥

तथा च 'आत्मन आकाशस्सम्भूतः' इत्यादौ न गौणताप्रसङ्गः । अत्र पृथिव्यतेजसां त्रिवृत्करणं छान्दोग्येऽभिहितं 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति । तच्च—स्वसजातीयधर्मद्वयविशिष्टधर्मवत्त्वम्। सजातीयं च—पृथिवीत्वजलत्वतेजस्त्वान्यतमत्वेन । धर्मद्वय-

वैशिष्ट्यं च–स्वाश्रयचतुर्थांशसंयुक्तार्धभागवृत्तित्वसम्बन्धेन। तथा च स्वपदेन पृथिवीत्वोपादाने उक्तान्यतमत्वरूपेण स्वसजातीयधर्मद्वयं जलत्वं तेजस्त्वं च, तदाश्रयजलचतुर्थांशतेजश्चतुर्थांशयोस्संयोगस्य पृथिव्यर्धभागे सत्त्वादुक्तसम्बन्धेन जलत्वतेजस्त्वोभयविशिष्टपृथिवीत्ववत्त्वं पृथिव्यामुपपन्नम् । त्रिवृत्करणपक्षे भूते भूतान्तरचतुर्थांशमेलनस्याभिमतत्वात्। चतुर्थांशसंयोगश्चाण्डोत्पत्त्यभावप्रयोजकीभूताभावप्रतियोगित्वेन विशेषणीयः ; तेन न यथाकथञ्चित्संयोगस्य त्रिवृत्करणरूपतापत्तिः, परस्परानुप्रवेशात्मकसंयोगस्यैव अण्डोत्पत्तिप्रयोजकत्वेनोक्तविशेषणेन तादृशसंयोगस्यैव लाभात् ।

"नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन् प्रजास्स्रष्टुमसमागम्य कृत्स्नशः ॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
एकसङ्घातलक्ष्यास्तु संप्राप्यैक्यमशेषतः ॥
महदादयो विशेषान्ता ह्यण्डमुत्पादयन्ति ते ।"

इति भगवत्पराशरवचनाद्विलक्षणसंयोगाभावस्यैवाण्डोत्पत्त्यभावप्रयोजकत्वाभिधानात्। "संहतत्वं समागतत्वं चेत्यवस्थाद्वयमस्ति । तत्र संहतत्वं नाम–पृथक्स्थित्यर्हसंयोगमात्रं, समागतत्वं च–पृथक्स्थित्यनर्हसंयोगविशेषः"—इति व्यासार्यैर्व्याख्यातम् ॥

पञ्चीकरणं सप्तीकरणं च पुराणप्रसिद्धम्। स्वसजातीयधर्मचतुष्टयविशिष्टधर्मवत्त्वं–पञ्चीकरणं ; सजात्यं च–पृथिवीत्वजलत्वतेजस्त्ववायुत्वाकाशत्वान्यतमत्वेन । धर्मचतुष्टयवैशिष्ट्यं च–स्वाश्रयाष्टमांशसंयुक्तार्धभागवृत्तित्वसम्बन्धेन । पञ्चीकरणपक्षे भूतानि प्रत्येकं द्विधा विभज्य पृथिव्याद्येकैकार्धेषु जलादीनामष्टमांशचतुष्टयसंयोगस्य स्वीकारात् ।

"एवं जातेषु भूतानि प्रत्येकं स्युर्द्विधा ततः ।
चतुर्धा भिन्नमेकैकमर्धमर्धं तथा स्थितम् ॥
व्योम्नोऽर्धभागश्चत्वारो वायुतेजःपयोभुवाम् ।
अर्धानि यानि वायोस्तु व्योमतेजःपयोभुवाम् ॥"

इत्यादिपुराणवचनात् ॥

एतेन–पृथिव्यादिकं द्वेधा विभज्य तदर्धं पञ्चधा विभज्य पञ्चस्वर्धान्तरेषु योजनं पञ्चीकरणम् ; तथा चोक्तलक्षणे स्वाश्रयाष्टमांशसंयुक्तेत्यपहाय दशमांशसंयुक्तेति वक्तव्यमिति–**निरस्तम्** । उक्तपुराणवचनविरोधात् ॥

सप्तीकरणं तु–स्वसजातीयधर्मषट्कविशिष्टधर्मवत्त्वं ; साजात्यं च महत्त्वाहङ्कारत्वपृथिवीत्वादिपञ्चकान्यतमत्वेन । धर्मषट्कवैशिष्ट्यं च स्वाश्रयद्वादशांशसंयुक्तार्धभागवृत्तित्वसम्बन्धेन । सप्तीकरणपक्षे पृथिव्याद्येकैकार्धं षोढा विभज्य षट्स्वर्धान्तरेषु संयोगस्याभिप्रेतत्वात् ॥

यद्यपि–पृथिव्याद्यर्धेषु जलादिचतुर्थांशसंयोगरूपत्रिवृत्करणस्य श्रुत्यभिप्रेतत्वे तदष्टमांशद्वादशांशसंयोगप्रतिपादनपराणामुदाहृतपुराणवचनानामप्रामाण्यं प्राप्नोति ; पञ्चीकरणपक्षे चतुर्थांशसंयोगासम्भवात्, वस्तुनि विकल्पासम्भवेनैकतराप्रामाण्यावश्यकत्वे 'विरोधे त्वनपेक्षं स्यात्' इति न्यायेन श्रुतिविरुद्धार्थे पुराणादेः प्रामाण्यासम्भवात् । **तथाऽपि**–तासां त्रिवृतं त्रिवृतमित्यादेरेकैकं तेजःप्रभृति भूतं स्वार्धेनेतरार्धयोर्भागद्वयेन च त्रिभागं करवाणीत्यर्थः ॥ तथा च–तादृशश्रुतौ चतुर्थांशसंयोगाप्रतीतेरष्टमांशसंयोगपरताया एवोपबृंहणानुरोधेनाङ्गीकारेण विरोधाभावात्, स्वाश्रयाष्टमांशसंयुक्तार्धभागवृत्तित्वसम्बन्धेन स्वसजातीयधर्मद्वयविशिष्टधर्मवत्त्वमेव त्रिवृत्करणं ; न तु चतुर्थांशघटितपूर्वोक्तलक्षणं ; उक्तदोषात् । सप्तीकरणपक्षे तु–त्रिवृत्करणं पञ्चीकरणं च द्वादशांशघटितं, न त्वष्टमांशघटितं ; तथा सति विरोधापत्तेः ।

इत्थं च सप्तीकरणैकदेशः पञ्चीकरणं, तदेकदेशस्त्रिवृत्करणमिति न परस्परविरोध इति बोध्यम् ॥

एतेन—चतुर्थांशघटितत्रिवृत्करणप्रतिपादकश्रुतिविरुद्धत्वात्पुराणमप्रमाणं, वाचस्पत्युक्तं त्रिवृत्करणमेव युक्तम्; तदुक्तं कल्पतरौ—

"सम्प्रदायाध्वना पञ्चीकरणं यद्यपि स्थितम्।
तथाऽपि श्रुतियुक्तिभ्यां वाचस्पतिमतं शुभम् ॥"

इत्यादिकं—निरस्तम् । उक्तरीत्या श्रुतिविरोधाभावात् ॥—इति ॥

इत्थं—पञ्चीकृतैस्सप्तीकृतैर्वा तत्त्वैरण्डाद्यारम्भो देहाद्युत्पत्तिश्च । न च—देहादेरनेकभूतोपादानकत्वे पृथिवीत्वादिजातीनां देहे सङ्करस्यादिति—वाच्यम् । अवयवातिरिक्तावयविनोऽस्माभिरनङ्गीकाराज्जातिसङ्कराप्रसक्तेः; कार्यकारणयोरनन्यत्वात् ॥ न च—पटतन्त्वादिरूपकार्यकारणयोरनन्यत्वं न सम्भवति; एकत्वानेकत्वस्थूलत्वसूक्ष्मत्वादिरूपविरुद्धधर्माध्यासात्, कारकव्यापारवैयर्थ्यापत्तेश्चेति—वाच्यम्; असमवायिकारणत्वेन भवदभिमतसंयोगविशेषविशिष्टतन्तूनामेव पटत्वेन तादृशसंयोगसम्पादनार्थमेव कारकव्यापारसार्थक्यात्; एकत्वस्थूलत्वादीनां राशिवनसेनादिष्विवोपपत्तेः; संयोगविशेषविशिष्टधान्यादीनामेव राशित्वेऽपि तद्गतापेक्षाबुद्धिविशेषविषयत्वरूपसमुदायस्यैकत्वेन एकत्वव्यवहारात्। अन्यथा पत्रताटङ्कादावपि पत्रात्ताटङ्कारम्भकल्पनाप्रसङ्गात्। तत्तावयवद्वयसंयोगरूपासमवायिकारणविरहेण तत्त्व द्रव्यारम्भस्य भवद्भिरप्यस्वीकारात्; इतरथा—आकुंचनप्रसरणादावपि द्रव्यान्तरकल्पनाप्रसङ्गात्। किञ्च—अवयवातिरिक्तावयविस्वीकारे अनेकावयवारब्धकनकशृङ्खलादावयवगतगुरुत्वैरवयविगुरुत्वोत्पत्त्यापातात्तोलने अधिकगुरुत्वोपलम्भप्रसङ्गः। न च—अवयविनि गुरुत्वोत्पत्त्यनन्तरमवयवगुरुत्वनाशान्नाधिक्यमिति—वाच्यम्; अवयवानां गुरुत्वशून्यत्वे शाखादीनां पतनाभावप्रसङ्गात्, समावयेन पतनं प्रति समवायेन

गुरुत्वस्यासमवायिकारणत्वात्, अवयविनि गुरुत्वानुत्पत्तौ च अवयविनः पतनानुपपत्तेः । एवं तन्तुसमुदायातिरिक्तस्य पटादिपदार्थत्वे दीर्घैकतन्तुभ्रमणारब्धे पटे पट इत्यादिव्यवहारानुपपत्तिः, असमवायिकारणरूपतन्तुद्वयसंयोगाभावेन तत्र पटानुत्पत्तेः ॥ अपि च—सहस्रतन्तुकपटस्थले द्वितीयतन्तुसंयोगमारभ्य प्रतितन्तुसंयोगं द्वितन्तुकादिपटपङ्क्तिरुत्पद्यते वा, न वा ? ॥ आद्ये—अनेकपटोपलम्भप्रसङ्गः। न च त्रितन्तुकपटोत्पत्तिदशायां द्वितन्तुकपटस्य नाशान्नापत्तिरिति वाच्यम्; नाशकाभावादहेतुकविनाशस्यायुक्तत्वात् । ततश्च पटपङ्क्तेरुपलम्भप्रसङ्गः । तदुक्तं सर्वार्थसिद्धौ—

"पूर्वसिद्धपटैस्सार्धं तन्तुभिः पटसम्भवे ।
पटपङ्क्तिस्समीक्ष्येत क्रमादाधिक्यशालिनी ॥
प्राक्सिद्धानां पटादीनामुत्तरोत्तरजन्मनि ।
अहेतुको विनाशश्च स्थिरपक्षे न युज्यते ॥"—इति ॥

द्वितीये—अन्त्यतन्तुसंयोगात्पूर्वमुत्पद्यमानानां पटप्रतीतीनां भ्रमत्वप्रसङ्गात्। न चेष्टापत्तिः; एकद्वितन्त्वाद्यपगमेऽपि जायमानायाः पटप्रतीतेर्भ्रमत्वप्रसङ्गात्। न च तत्रापीष्टापत्तिः; भवद्भिरपि तत्र खण्डपटोत्पत्तेरभ्युपगमेन भ्रमत्वानङ्गीकारात् ॥

अथ—पूर्वतन्त्रे नवमे "अग्निधर्मः प्रतीष्टकं सङ्घातात्पूर्णमासीवत्" इत्यधिकरणे 'हिरण्यशकलैरग्निं प्रोक्षति, मण्डूकेनाग्निं विकर्षति' इति विहितमग्निपदलक्षिताग्न्यधिकरणस्थण्डिलकर्मकं प्रोक्षणं विकर्षणं च अवयवातिरिक्तावयव्यभावात् प्रतीष्टकं कर्तव्यमिति पूर्वपक्षं प्रापय्य अवयवातिरिक्तावयविसद्भावात्सकृदेव कर्तव्यमिति सिद्धान्तितम्; तथा चावयवातिरिक्तावयव्यनङ्गीकारे तद्विरोधः—**इति चेन्न** ॥ व्रीह्यादिष्वतिरिक्तावयव्यभावेऽपि प्रतिव्यक्तिप्रोक्षणवदुपपत्तेः, पूर्वोत्तरपक्षयो-

रैकत्वावस्थानारम्भतदारम्भाभ्यां उपपत्तावेकत्वाश्रयातिरिक्तावयव्यारम्भानारम्भपरत्वे प्रमाणाभावात् ॥

अथ कालो निरूप्यते ॥ अतीतादिव्यवहारहेतुः कालः, कालिकसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणताश्रयत्वं—**तल्लक्षणम्**; ईश्वरवारणाय कालिकसम्बन्धावच्छिन्नेति; तस्यापृथक्सिद्धिसम्बन्धेन कार्यसामान्यं प्रति तादात्म्येन हेतुत्वेऽपि कालिकेन कार्यसामान्यं प्रत्यहेतुत्वात्, कालिकेन सर्वाधारत्वं च तल्लक्षणम् ॥

अथ—कालसद्भावे प्रमाणाभावः। न च—अतीतादिव्यवहारनिर्वाहार्थं तस्यावश्यकतेति—वाच्यम्; प्रकृतशब्दप्रागभावावच्छिन्नाकाशादिभिरतीतव्यवहारस्य, प्रकृतशब्दावच्छिन्नाकाशादिभिर्वर्तमानव्यवहारस्य, प्रकृतशब्दध्वंसावच्छिन्नाकाशादिभिर्भविष्यद्व्यवहारस्य च निर्वाहसम्भवेनातिरिक्तकालकल्पनानावश्यकत्वात्—**इति चेन्न** ॥ 'सदेव सोम्येदमग्र आसीत्' इत्यादिश्रुत्या आकाशोत्पत्तेः पूर्वमपि कालबोधनात्तत्तदुपाध्यवच्छिन्नाकाशस्य कालरूपत्वासम्भवादतिरिक्तकालकल्पनस्यावश्यकत्वात् ॥ न चैवमपि—'अनादिर्भगवान् कालो नान्तोऽस्य द्विज विद्यते', 'कालोऽस्मि लोकक्षयकृत्प्रवृद्धः' इत्याद्यनुरोधाद्भगवत एव कालत्वमस्तु; तत्तदुपाध्यवच्छिन्नस्य तस्य प्रलयेऽपि सत्त्वेन सर्वव्यवहारनिर्वाहकत्वसम्भवादिति—वाच्यम्। तथा सति 'विष्णोस्स्वरूपात्परतोदिते द्वे' इत्यारभ्य, 'रूपान्तरं तद्द्विज कालसंज्ञं' इत्यादिविष्णुपुराणविरोधापत्तेः; स्वस्य स्वापेक्षया रूपान्तरत्वायोगात्, 'ब्रह्मा दक्षादयः कालः' इति कालस्य भगवद्विभूतित्वाभिधानविरोधाच्च। 'विष्णुर्मन्वादयः कालः' इत्यत्र विष्णुशब्दस्यावतारविष्णुपरत्वेन तस्यापि विभूतित्वाविरोधात्, 'अनादिर्भगवान् कालः' इत्यादिसामानाधिकरण्यस्य शरीरशरीरिभावेन निर्वाहात् ॥ न चैवं

जैनमतनिराकरणपरभाष्ये 'कालस्य पदार्थविशेषणतयैव प्रतीतेस्तस्य पृथगास्तित्वनास्तित्वादयो न वक्तव्याः, न च परिहर्तव्याः' इत्यादिना कालनिराकरणं प्रतीयमानं विरुध्यत इति—वाच्यम्। सर्वप्रतीतिषु विशेषणतया सर्वलोकानुभवसिद्धस्य कालस्य नास्तित्वशङ्काया बौद्धादिभिरपि कर्तुमशक्यतया जैनानां कालास्तित्वसाधनस्य विफलत्वादित्यत्र तद्भाष्यतात्पर्यात्, तन्निराकरणे तात्पर्यविरहात्; एवमेव श्रुतप्रकाशिकासर्वार्थसिद्ध्योस्तद्भाष्याशयवर्णनात्। अत एव वेदार्थसङ्ग्रहे—

"निमेषकाष्ठाकलामुहूर्तादिपरार्धपर्यन्तापरिमितावच्छेदसर्वोत्पत्तिस्थितिविनाशादिसर्वपरिणामनिमित्तभूतकालकृतपरिणामास्पृष्टानन्तमहाविभूति"

इत्यादिना कालाभ्युपगमो भाष्यकृतां सङ्गच्छते। अन्यथा भाष्यवेदार्थसङ्ग्रहयोर्विरोधापत्तेः। निमेषकाष्ठाकलामुहूर्ताद्याः परार्धपर्यन्ता अपरिमिता अवच्छेदाः कालविभागाः स्वरूपमसाधारणधर्मो यस्य कालस्य, स तथोक्तः। तादृश एव सन्महदादिसर्वोत्पत्तिस्थितिविनाशादिसर्वपरिणामनिमित्तभूतो यः कालस्तत्कृतपरिणामास्पृष्टानन्तमहाविभूतियुक्तं ब्रह्मेति तदर्थात्॥

न च—नित्यविभूतेः कालकृतपरिणामास्पर्शे कार्यसामान्ये कालस्य कारणत्वानुपपत्तिः, प्राकृतकार्यसामान्यं प्रति कारणत्वमिति स्वीकारे च धर्मभूतज्ञानपरिणामादेः कार्यतावच्छेदकानाक्रान्ततया कालकार्यत्वानुपपत्तिरिति—वाच्यम्। नित्यविभूतिभिन्नकार्यसामान्यं प्रत्येव तस्य हेतुतास्वीकारात् पूर्वोक्तलक्षणेऽपि नित्यविभूतिभिन्नकार्यत्वावच्छिन्नकार्यतायां एव निवेशात्। 'कालं स पचते तत्र न कालस्तत्र वै प्रभुः', 'कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः' इत्यादिवचनात्। सर्वाधारत्वलक्षणे च नित्यविभूतिभिन्नत्वं न निवेश्यम्, नित्यविभूतेरपि कालवृत्तित्वाङ्गीकारात्। अन्यथा

नित्यविभूतेः स्वपरिणामं प्रति हेतुत्वानुपपत्तेः, हेतुतायाः पूर्वकालवृत्तित्वघटितत्वात् । एवं नित्यविभूतेः कालासम्बन्धित्वे तदवच्छेदेन जायमानकार्यस्यापि कालासम्बन्धित्वापत्त्या 'सदा पश्यन्ति सूरयः' इति श्रुतिविरोधाच्च। नित्यसूरिनिष्ठदर्शनस्यापि कालवृत्तित्वात्॥

अयं च कालो नित्यो विभुरेक एव ; क्षणादिव्यवहारस्तु एकस्याप्युपाधिभेदादुपपद्यते । यद्वा कालस्यैकस्यैव क्षणलवादिरूपेण परिणामाङ्गीकारात् विभिन्नव्यवहारोपपत्तिः। 'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि, कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः', 'कालं स पचते तत्र', 'कलामुहूर्तादिमयश्च कालः'—इत्यादिस्मृतेश्च । क्षणादयः परिणामा अपि सर्वगता एव; एकैकक्षणादिसम्बन्धस्य सर्वपदार्थेषु प्रतीतेः ॥

"एकेनैव क्षणेनास्य विश्वस्यापि विशेषणात् ।
कालवत्तत्क्षणानां च व्यापित्वमवसीयते ॥" —इत्युक्तेः ॥

न च—कालिकसम्बन्धे न देशनैरन्तर्यं नियामकं, किं तु कालनैरन्तर्यमेव ; तथा च क्षणादेरणुत्वेऽपि सर्वाधारतासम्भवः—इति वाच्यम्। देशतो व्यवहितयोस्सम्बन्धकल्पनस्यानुभवविरुद्धत्वात्, तत्तत्कालसंयोगातिरिक्तकालिकसम्बन्धे मानाभावाच्च; अद्रव्ये च संयुक्तापृथक्सिद्धेरेव कालिकसम्बन्धत्वेन रूपादेरपि कालवृत्तितानिर्वाहात्। न च—कालतत्परिणामयोर्द्वयोरेव विभुत्वाङ्गीकारे परिणामपरिणामिभावानुपपत्तिः, विभोर्विकारित्वस्य विकारत्वस्य चादर्शनादिति—वाच्यम्। ईश्वरज्ञानतत्परिणामयोर्विभुत्वेऽपि विकारविकारिभावोपलब्धेः । **एतेन**—कालो न विकारी, विभुत्वात्; क्षणादिर्न विकारः, विभुत्वात्; ईश्वरवत्—**इत्यनुमानं निरस्तम्**। ईश्वरज्ञाने व्यभिचारात् ॥ न च—कालस्य क्षणरूपेण परिणाम एव युक्तः, न तु दिवसादिरूपेण परिणामः ; तादृशक्षणकूटादेव दिवसादिव्यवहारनिर्वाहादिति—वाच्यम् ;

तथा सति 'अमावास्यायां पितृभ्यो दद्यात्' इत्यादौ लिङः प्रत्यवाय-प्रयोजकीभूताभावप्रतियोगित्वार्थकतया अमावास्यानिष्ठस्य श्राद्धकरणाभावस्य प्रत्यवायप्रयोजकत्वबोधनेन श्राद्धकर्तुरपि प्रत्यवायप्रसङ्गात्, कृतेऽपि श्राद्धे अमावास्याघटकेषु केषुचित्क्षणेषु श्राद्धकरणाभावस्य निरवच्छिन्नविशेषणतासम्बन्धेनापि सत्त्वात् । दिवसस्याखण्डातिरिक्तपरिणामात्मकत्वे च श्राद्धकरणस्थले तत्र निरवच्छिन्नविशेषणतया तदभावविरहान्न प्रत्यवायापत्तिः । एवं पक्षमासादिपरिणामस्वीकारेऽपि युक्तिर्बोध्या ॥

अयं च कालप्पडिन्द्रियवेद्यः ; घटस्सन्निति चाक्षुषादिप्रतीतेस्सर्वसिद्धत्वात्, तत्र सत्त्वस्य कालसम्बन्धित्वरूपत्वात् । न च—तादृशप्रत्यक्षे सत्ताजातिरेव विषय इति—वाच्यम् ; सामान्यं सदित्यादिप्रत्यक्षानुपपत्तेः । न च—तादृशप्रतीतौ सामानाधिकरण्यसम्बन्धेन सत्ताया भानमिति—वाच्यम् ; घटस्सन्, सामान्यं सदिति—प्रतीत्योरविलक्षणाकारतया क्वचित्समवायेन सत्ताया विषयत्वं, क्वचित्सामानाधिकरण्येन तस्या विषयत्वमिति कल्पनाया अनुपपन्नत्वात् । कालसम्बन्धस्यैव सत्त्वरूपत्वे चोभयत्रैकाकारतानिर्वाहः ॥ **मीमांसकैस्तु** कालस्य सर्वज्ञानविषत्वमुक्तम्—

"न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते ॥" —इति॥ तत्र प्रत्यक्षं स्वाधिकरणक्षणावच्छिन्नमेव स्वविषयमवगाहत इत्युत्सर्गः । अत एव धारावाहिज्ञानस्थले तत्तत्क्षणविशिष्टघटादेर्भानात् द्वितीयादिज्ञानानामप्यज्ञातज्ञापकत्वात्प्रामाण्यमिति मीमांसकाः ॥

परत्वापरत्वे च बहुकालसंयुक्तत्वाल्पकालसंयुक्तत्वरूपे, न तु गुणान्तरमिति वक्ष्यते ॥

दिग्द्रव्यं तु नातिरिक्तं, तत्तन्मूर्तात्मकोपाध्यवच्छिन्नाकाशादिभिस्तत्तन्मूर्तैरेव वा प्राच्यादिव्यवहारनिर्वाहात् । चैलादिनिष्ठोदय-

L-1945

गिरिसंयुक्तसंयोगापेक्षया अल्पतरोदयगिरिसंयुक्तसंयोगवन्मूर्तं चैत्रस्य प्राची, चैत्रनिष्ठोदयगिरिसंयुक्तसंयोगापेक्षया अधिकतरोदयगिरिसंयुक्तसंयोगवन्मूर्तं चैत्रस्य प्रतीची ; एवं सुमेरुसंयुक्तसंयोगाल्पत्वभूयस्त्वाभ्यामुदीचीत्वदक्षिणात्वे बोध्ये । न च–'पद्भ्यां भूमिर्दिशश्श्रोत्रात्' इति दिशः पृथक्सृष्टेः, 'दिशःश्रोत्रम्' इति पृथग्लयस्य च श्रुतिसिद्धत्वादाकाशाद्यतिरिक्तं कार्यभूतं दिग्द्रव्यमभ्युपगन्तव्यमिति—वाच्यम् ; तथा सति 'नाभ्या आसीदन्तरिक्षं, शीर्ष्णो द्यौस्समवर्तत' इति पूर्ववाक्ये स्वर्गान्तरिक्षयोरपि पृथक्सृष्टिश्रुत्या तयोरप्यतिरिक्तद्रव्यत्वापत्तेः, पूर्ववाक्यस्याभिमानिदेवतासृष्टिपरत्वे चोत्तरवाक्यस्यापि तत्परताया एवोचितत्वात् ; 'चन्द्रमा मनसो जातः, चक्षोस्सूर्यो अजायत' इति देवतासृष्टेरेव प्रक्रान्तत्वात् । किञ्च 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च', 'खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' इति श्रुतौ वाय्वपेक्षया प्राणस्य पृथक्सृष्टिश्रवणेऽपि वायुविशेषत्वमेव **न वायुक्रिये पृथगुपदेशात्** इत्यधिकरणे निर्णीतम् । तच्च पृथक्सृष्टिमतां दिगादीनामपि प्रदर्शनार्थं मन्तव्यम् । एवं दिशो व्यष्टिदशायां सृष्टेः श्रूयमाणतया तदनुरोधेन सृष्टिकल्पने तत्सृष्टेः पूर्वं तन्नाशानन्तरं च विद्यमानानां प्रकृतिमहदहङ्कारादितत्त्वानामावरणावार्यभावानुपपत्तेः ; अहङ्काराद्यपेक्षया सर्वदिग्व्यापकत्वरूपस्याहङ्कारावरणत्वस्य दिग्घटितत्वात्, तद्दशायां दूरासन्नत्वादिव्यवस्थानुपपत्तेश्च ; दिशः प्रकृतिकार्यत्वे नित्यविभूतौ प्राच्यादिव्यवस्थानुपपत्तेश्च । न च–समष्टिदशायां प्रकृतिप्रदेशात्मकोपाधिभिर्नित्यविभूतौ च तत्प्रदेशरूपोपाधिभिरेव प्राच्यादिव्यवहारनिर्वाहः–इति वाच्यम् ; तथा सति सर्वत्रोपाधिभिरेव प्राच्यादिव्यवहारनिर्वाहाद्दिशो द्रव्यान्तरत्वे मानाभावादिति ॥

इत्यनन्तार्यकृतौ सिद्धान्तसिद्धाञ्जने
जडपरिच्छेदः प्रथमः ॥

अथ जीवो निरूप्यते ॥

अणुत्वे सति ज्ञानाश्रयत्वं, स्वव्यधिकरणसङ्कल्पजन्यकृतिमत्त्वं च—तल्लक्षणं। लक्षणद्वयेऽपीश्वरवारणाय सत्यन्तं जन्यान्तं च। जीवकृतिसामान्यस्य स्वव्यधिकरणेश्वरसङ्कल्पजन्यत्वाल्लक्षणसङ्गतिः। न च—'नित्यस्सर्वगतः' इति श्रुत्या जीवस्य विभुत्वबोधनाच्छरीरस्य देशान्तरगमनेऽपि ज्ञानसुखाद्युत्पत्तिदर्शनात्तन्निर्वाहायात्मनोऽपि गमनागमनादिकल्पने गौरवाच्च विभुत्वकल्पनमेवोचितमित्यणुत्वघटितलक्षणासम्भव इति—वाच्यम्।

"एषोऽणुरात्मा चेतसा वेदितव्यो बुद्धेर्गुणेनात्मगुणेन चैव ह्यारा ग्रमात्रो ह्यवरोऽपि दृष्टः",

"वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवस्स विज्ञेयः"—

इत्यादिश्रुतिभिर्जीवस्याणुत्वसिद्धौ सर्वगतत्वश्रुतेः 'अग्निर्यथैको भुवनं प्रविष्टः', 'वायुस्सर्वगतो महान्'—इत्यादिवदेकजातीयानां सर्वत्रानुप्रवेशपरत्वेन जीवस्सर्वगत इत्यस्य द्रव्यत्वसमानाधिकरणभेदप्रतियोगितानिरूपितसंयोगसम्बन्धावच्छिन्नावच्छेदकतानवच्छेदकजीवत्वाश्रय इत्यर्थात्, द्रव्ये तत्तद्व्यक्तित्वावच्छिन्नजीवनिष्ठावच्छेदकताकभेदसत्त्वेऽपि जीवत्वावच्छिन्नसंयोगावच्छिन्नावच्छेदकताकभेदाभावात्॥ न च—एषोऽणुरात्मेति परमात्मन एवेन्द्रियजन्यज्ञानाविषयत्वात्मकदुर्दर्शत्वरूपमणुत्वं प्रतिपाद्यते; न चक्षुषा गृह्यत इत्यादिना तस्याव्यवहितपूर्ववाक्ये प्रकृतत्वात् चेतसावेदितव्य इति विशुद्धमनोग्राह्यत्वलिङ्गाच्चेति—वाच्यम्; 'यस्मिन् प्राणः पञ्चधा संविवेश' इति यच्छब्दयोगेनैतच्छब्दस्य वक्ष्यमाणपरामर्शित्वात्। न च—तत्रापि परमात्मैव प्रतिपाद्यते, 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः प्राणैश्च सर्वैः' इत्यादाविव

प्राणाधारत्वस्य परमात्मन्यपि सम्भावादिति वाच्यम्; यस्मिन् द्यौरित्यादेरिवास्य वाक्यस्य सर्वाधारताप्रतिपादनपरत्वाभावात् जीवासाधारणप्राणचित्तेन्द्रियाधारत्वमात्रप्रतिपादपरत्वात् जीवपरतायाः एव युक्तत्वात् । न च वेदितव्यत्वलिङ्गविरोधः; नियन्तृनियाम्यवैलक्षण्यज्ञानस्य अमृतत्वसाधनत्वादविरोधात्, इहापि पूर्वत्र 'बृहच्च तद्दिव्यमचिन्त्यरूपम्' इति परमात्मनो महत्त्वमुक्त्वा एषोऽणुरात्मेति जीवे तद्वैलक्षण्यप्रतिपादनात् ॥

न च—अत्र वाक्ये चेतसाणुरित्यन्तःकरणौपाधिकमणुत्वं प्रतिपाद्यत इति—वाच्यम् । चेतसेत्यस्य वेदितव्य इत्यनेनैव अन्वयस्य स्वरसतः प्रतीतेः । बुद्धेर्गुणेनेत्यत्र च—बुद्धेर्गुणेनाराग्रमात्रः आत्मगुणेन महानिति नार्थः; व्यवहितान्वयप्रसङ्गादध्याहारप्रसङ्गात्, समुच्चयार्थनिपातानन्वयाच्च । किं तु अपरो जीवस्संसारदशायां बुद्धेर्गुणेनात्मगुणेन चाराग्रमात्रः; आरा—चर्मसूची, बुद्धेर्विभुत्वयोग्यत्वेऽपि कर्मणा सङ्कुचितत्वान्मलरुद्धमणिप्रभावदाश्रयतुल्यपरिमाणोपपत्तेः। बुद्ध्या सह पूर्वमणुत्वस्य कीर्तनात्तद्वत्कादाचित्कताशङ्काव्यावृत्त्यर्थं पुनस्स्वरूपमाह—वालाग्रेत्यादि। पुनःकीर्तनात्स्वाभाविकतासिद्धेः आत्मा न विभुः, क्रियावत्त्वात्, घटादिवत्—इत्यनुमानेन विभुत्वस्य बाधाच्च । न च क्रियावत्त्वमसिद्धम्; 'तेन प्रद्योतैनष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः' इति श्रुत्या विभागानुकूलव्यापाररूपनिष्क्रमणस्य, 'ये वै के चास्माल्लोकात्प्रयन्ति, चन्द्रमसमेव ते सर्वे गच्छन्ति' इति श्रुत्या संयोगानुकूलव्यापाररूपगमनस्य, 'तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे' इति श्रुत्या स्वसजातीयसंयोगध्वंससमानाधिकरणसंयोगानुकूलव्यापाररूपपुनरागमनस्य च जीवे सिद्धत्वात् । स्वपदं धात्वर्थतावच्छेदकसंयोगत्वावच्छिन्नपरं; साजात्यं च स्वप्रतियोगिप्रतियोगिकसंयोगत्वेन ॥

यद्यपि–निष्क्रामति गच्छतीत्यादौ शरीरनिष्ठं यन्निष्क्रमणगमनादिकं तदनुकूलकृतिमत्त्वमेव जीवे प्रतीयते, न तु क्रियावत्त्वं; आख्यातस्य यत्नार्थकत्वात्। तथाऽपि शरीराविरहदशायामेवोक्तश्रुतिपूत्क्रान्त्यादीनां श्रूयमाणत्वेन रथो गच्छतीत्यादाविव आख्यातस्य आश्रयत्वार्थकताया एव वक्तव्यत्वादुक्तश्रुतिभिरात्मनः क्रियावत्त्वं सिध्यति ॥ न च–निष्क्रामतीत्यस्य प्राणविभागाश्रय इत्यर्थाङ्गीकाराद्विभुत्वपक्षेऽपि नानुपपत्तिरिति–वाच्यम्। **तथाऽपि**–'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति, प्राणमुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इत्यादौ जीवोत्क्रमणजन्योत्क्रमणाश्रयत्वस्य प्राणेषु प्रतीत्या जीवस्य क्रियावत्त्वावश्यकत्वात्; यज्ञमनुप्रावर्षीदित्यादाविव अनुशब्दस्य जन्यत्वार्थकत्वात्, द्वितीयायाश्च निरूपितत्वार्थकत्वात्, उत्क्रमणविशिष्टजीवजन्यत्वस्य जीवोत्क्रमणजन्यत्वे पर्यवसानात्, **'अनुर्लक्षणे'** इन्यनेन जन्यत्वरूपलक्षणार्थकानुशब्दयोगे द्वितीयाविधानात्, गत्यागतिश्रुतेरनिर्वाहाच्च। एतदभिप्रेत्यैव सूत्रितम् **'उत्क्रान्तिगत्यागतीनां'**, **'स्वात्मना चोत्तरयोः'**–इति। किञ्चात्मनो विभुत्वे अन्यदीयमनसा अन्यात्मनः प्रत्यक्षापत्तिः; आत्ममनस्संयोगे परात्मसंयोगव्यावृत्तं वैजात्यं कल्पयित्वा तेन रूपेणात्ममानसं प्रति हेतुतास्वीकारे च गौरवात् ॥

न च–जीवस्याणुत्वे प्रत्यक्षानुपपत्तिः, प्रत्यक्षसामान्ये महत्त्वस्य कारणत्वात्; अन्यथा परमाणोरपि प्रत्यक्षत्वापत्तिरिति–वाच्यम्। नालसूर्यमरीचिकास्थस्य त्रसरेणुशब्दवाच्यस्यैव परमाणुत्वेन तदतिरिक्तपरमाणोरस्वीकारात्, तस्य च प्रत्यक्षाङ्गीकारेण प्रत्यक्षे महत्त्वस्य हेतुत्वानभ्युपगमात् ॥

अथ–जीवस्याणुत्वे एकस्य जीवस्यानेकशरीरावच्छेदेन सुखदुःखादिप्रतिसन्धानानुपपत्तिः; न चेष्टापत्तिः, सौभरिप्रभृतीनामेकदा

अनेकशरीरावच्छेदेन सुखदुःखादिसाक्षात्कारस्य पुराणादिसिद्धत्वात्। न च—जीवस्य तत्र तत्र गमनवशादनेकशरीरावच्छेदेनापि सुखाद्युपलम्भोपपत्तिः, वेगातिशयाच्च क्रमेण जायमानानामपि सुखदुःखाद्यनुभवानां यौगपद्यभ्रमः शतपत्रच्छेदनयौगपद्यभ्रमवदिति—वाच्यम्। योगिनां भ्रमासम्भवात्, प्रयत्नवदात्मसंयोगस्यैव शरीरपतनप्रतिबन्धकत्वेनानेकदेशविद्यमानानामनेकशरीराणां युगपद्धारणानुपपत्तेश्च, एकशरीरे तादृशात्मसंयोगदशायामन्यशरीरे संयोगनाशात्—इति चेन्न ॥ प्रयत्नवदात्मसंयोगत्वेन पतनप्रतिबन्धकत्वे गौरवात्संयोगेन प्रयत्नत्वावस्थापन्नधर्मभूतज्ञानस्यैव शरीरपतने प्रतिबन्धकत्वात्, आत्मन एकशरीरस्थत्वेऽपि धर्मभूतज्ञानस्य मणिप्रभान्यायेन अनेकशरीरेषु प्रसरणोपपत्तेः, निरात्मकेषु शरीरेषु धर्मभूतज्ञानव्याप्त्यैव सुखदुःखाद्यनुभवोपपत्तेः, जीवस्य सुखाद्यनुभवार्थं तत्र तत्र गमनाकल्पनात्, 'गुणाद्वाऽऽलोकवत्', 'प्रदीपवदावेशस्तथा हि दर्शयति' इति सूत्राभ्यां तथा प्रतिपादनात् ॥ न च—सुषुप्त्यवस्थायां शरीरधारणानुपपत्तिः, निरात्मकशरीरस्य धर्मभूतज्ञानसंयोगेनैव धारणस्य वक्तव्यत्वात्तद्दशायां धर्मभूतज्ञानप्रसरणाभावादिति—वाच्यम्; तद्दशायामपि निरात्मकशरीरेषु धर्मभूतज्ञानसंयोगाभ्युपगमात्; विषयतारूपविजातीयसंयोगस्यैव तदानीमस्वीकारात् ॥ न च—'अस्य सोम्य महतो वृक्षस्य यदेकां शाखां जीवो जहाति, अथ सा शुष्यति' इति श्रुत्या जीवस्य सङ्कोचविकासप्रतीत्या अणुत्वानुपपत्तिरिति—वाच्यम्; तादृशश्रुत्या धर्मभूतज्ञानसङ्कोचविकासयोरेव शरीरशोषणाशोषणप्रयोजकत्वावगमात्, शाखादौ भोगावच्छेदकताप्रयोजकादृष्टनाशाधीनधर्मभूतज्ञानविभागानुकूलव्यापारस्यैव जहात्यर्थत्वात् ॥

उक्तं चाधिकरणसारावल्यां—

"मैवं शाखादिभोगायननियतिकरोपाधिनाशात्प्रहाणं
क्षेत्रादिन्यायतोऽसावभिमतिविरहात्स्यादधीतो जहातिः॥"—इति॥

न चैवं–निरात्मकशरीरेषु स्वापार्थं प्रवृत्त्यनुपपत्तिः, सौषुप्तिकात्मस्वरूपात्मकसुखानुभवार्थमेव प्रवृत्तेर्वक्तव्यत्वात्तत्रात्मस्वरूपाभावात्तत्स्वरूपात्मकसुखानुभवासम्भवादिति–वाच्यम् ; जाग्रदवस्थाकालीनशरीरायासजनितदुःखोपशान्त्यर्थमेव तत्र प्रवृत्त्युपपत्तेः—

"स्वापे सुखत्वाभिज्ञानात्तद्विच्छिदे च रोषतः ।
तदर्थमन्यत्यागाच्च श्रुतिस्मृतिशतैरपि ॥"

इति **विष्णुचित्त**वचनस्य स्वापार्थप्रवृत्तेस्सुखानुभवार्थत्वपरस्य च सात्मकशरीरविषयत्वेन तद्विरोधाभावात् ॥ न च–बीजगताङ्कुरत्वावस्थायाश्चैत्रभोगजनिकायास्तदृष्टजन्यत्वादङ्कुरत्वावस्थां प्रत्यात्मगतादृष्टस्य स्वाश्रयसंयोगेन कारणत्वं वाच्यम्, आत्मनोऽणुत्वे च तन्न सम्भवतीति–वाच्यम् । कार्यसामान्ये अदृष्टस्य स्वाश्रयसंयोगेन हेतुत्वे शब्दादावदृष्टस्य कारणत्वानुपपत्तेः, विभोरात्मनः विभावाकाशे संयोगासम्भवात् नैयायिकैर्विभुद्वयसंयोगानुपगमात्; स्वाश्रयसंयुक्तसंयोगेन अदृष्टस्य हेतुत्वे चाणुत्वपक्षेऽप्यनुपपत्तिविरहात्स्वाश्रयजीवसंयुक्तेश्वरसंयोगस्य बीजेऽपि सत्त्वात्। अदृष्टस्य भगवत्सङ्कल्परूपताया वक्ष्यमाणत्वेन भगवदात्मनश्च विभुत्वेन जीवस्याणुत्वेऽपि स्वाश्रयसंयोगेनैवादृष्टस्य हेतुत्वसम्भवाच्च, विभुद्वयसंयोगाङ्गीकारेण कालगतपरिणामेऽपि तत्सम्बन्धेन हेतुताया अबाधात् ॥

स चायमात्मा ज्ञानाश्रयो ज्ञानस्वरूपश्च । 'विज्ञातारमरे केन विजानीयात्', 'जानात्येवायं पुरुषः' इत्यादिश्रुत्या ज्ञानाश्रयत्वस्य 'विज्ञानं यज्ञं तनुते', 'यो विज्ञाने तिष्ठन्' इत्यादिश्रुत्या ज्ञानस्वरूपत्वस्य च प्रतिपन्नत्वात्॥ यद्यपि–'विज्ञानं यज्ञं तनुते' इत्यादौ विज्ञानपदं तद्गुणसारत्वादितिसूत्रे ज्ञानाश्रयपरं व्याख्यातम् । तथाऽपि 'एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' इति–श्रुतौ द्रष्टा श्रोतेति विशेषतो बोद्धेति सामान्यतश्च ज्ञानाश्रयत्वस्यो-

क्तत्वेन विज्ञानात्मेत्यस्य ज्ञानाश्रयत्वपरत्वे पौनरुक्त्यापत्त्या ज्ञानस्वरूपत्वपरत्वावश्यकतया ज्ञानस्वरूपत्वसिद्धिः ॥

अथ–आत्मनो ज्ञानत्वं न सम्भवति, तस्य सविषयकत्वव्याप्यत्वात्, आत्मनश्च सविषयकत्वासम्भवात्। न तावदात्मनस्स्वभिन्नविषयकत्वं, अनङ्गीकारात्; अङ्गीकारे च धर्मभूतज्ञानवैयर्थ्यापत्तेः। नापि स्वमात्रविषयकत्वं, भाष्ये निष्प्रकारकज्ञाननिराकरणेन तद्विरोधात्॥ न च–आत्मस्वरूपज्ञानस्याहमित्याकारकस्य प्रत्यक्त्वैकत्वप्रकारकत्वाङ्गीकारान्न निष्प्रकारकत्वमिति–वाच्यम्; प्रत्यक्त्वस्यात्मविशेषणत्वेनात्मस्वरूपत्वासम्भवेन आत्मस्वरूपज्ञानस्य तत्प्रकारकत्वासम्भवात्, प्रत्यक्त्वात्मनोरभेदे आधाराधेयभावासम्भवात्। अन्यथा **'भेदव्यपदेशाच्चान्यः' 'उभयेऽपि हि भेदेनैनमधीयते'** इत्यादौ च 'आदित्ये तिष्ठन् य आत्मनि तिष्ठन्' इत्यादेराधाराधेयभावप्रतिपादकस्य भेदप्रतिपादकत्वेनोपन्यासासङ्गत्यापत्तेः। एकत्वस्य सङ्घचारूपतया आत्मस्वरूपत्वासम्भवाच्च–इति॥ **मैवम्**। प्रत्यक्त्वैकत्वयोरात्मस्वरूपातिरिक्तत्वेऽपि तन्मात्रप्रकारकत्वस्य स्वरूपात्मकानुभवे अभ्युपगमेन विरोधाभावात्। अनतिरिक्तापक्षेऽपि न दोषः, अभेदेऽप्याधाराधेयभावोपगमात्॥ न चोक्तसूत्रविरोधः 'य आदित्यमन्तरो यमयति', 'य आत्मानमन्तरो यमयति' इति नियाम्यनियामकभावोक्त्या तत्सहिताधाराधेयभावस्य भेदव्याप्यत्वेऽपि शुद्धाधाराधेयभावस्य अभेदेऽपि सम्भवात्। एवमनुकूलत्वस्यापि तत्र प्रकारतया भानमनुमतम्; अहमर्थः प्रत्यक्त्वेनानुकूलत्वेनैकत्वेन च स्वतो भातीति श्रुतप्रकाशिकायामभिधानात्। अत एव सुखमहमस्वाप्समिति प्रत्यभिज्ञोपपत्तिः; अन्यथा सुषुप्तिकाले आत्मगतानुकूलत्वस्य अननुभूतत्वे तत्प्रतिसन्धानासम्भवात्, तदशायां धर्मभूतज्ञानस्यात्यन्तसङ्कुचितत्वेन तेनानुकूलत्वस्य दुर्ग्रहत्वात्॥ न च–

स्तोकं पचतीत्यादौ पाकस्य स्तोकत्वमिव सुखमहमस्वाप्समिति प्रतीतौ स्वापस्यैव सुखरूपत्वं भासते, न त्वात्मनः; तथा च स्वगतानुकूलत्वस्य आत्मग्राह्यत्वेऽपि स्वापगतानुकूलत्वस्य तेन ग्रहणासम्भवात्प्रतिसन्धानानुपपत्तिः तदवस्थैवेति—वाच्यम् । ज्ञानसामान्याभावरूपस्यात्मगतस्वापस्याधिकरणस्वरूपत्वेन तद्गतानुकूल्यस्यात्मगतानुकूल्यादनतिरिक्तत्वात् ॥

ननु—सुखमहमस्वाप्समिति ज्ञानस्य प्रत्यभिज्ञानरूपत्वं न सम्भवति; पूर्वाननुभूतयोरतीतकालस्वापयोरपि तत्र भानात्, प्रत्यभिज्ञायामसन्निकृष्टार्थस्य पूर्वानुभूतस्यैव भाननियमात् ॥ अथ—स्वापकालांशेऽनुमितिरूपमेकं ज्ञानं, सुखविशिष्टात्मांशे च प्रत्यभिज्ञारूपमपरं ज्ञानमिति ज्ञानद्वयात्मकमेव सुखमहमस्वाप्समिति ज्ञानम्। जागराद्यः क्षणः कालपूर्वकः, कालत्वात्, द्वितीयादिक्षणवत्—इत्यनुमानेन पूर्वकालमनुमाय; तत्कालावच्छिन्नोऽहं ज्ञानाभाववान्, ज्ञानसामग्रीविरहवत्त्वात्, तुल्ययोगक्षेमे आत्मादौ स्मर्यमाणेऽपि तद्वत्तया नियमेन अस्मर्यमाणत्वाद्वेति प्रयोगासम्भवात्। उक्तं च **न्यायसिद्धाञ्जने**—

"प्रत्यक्स्वयंप्रभसुखे नित्ये पुंसि व्यवस्थिते ।
अस्वाप्सं सुखमित्यादौ कालाद्यंशेऽनुमास्थितिः ॥"

—इति चेन्न॥ ज्ञानद्वयकल्पनापेक्षया आत्मसुखांशयोरप्यनुमितिरूपत्वकल्पने लाघवात् ॥ —**इति चेत्** ॥

अत्र व्यासाचार्याः—सुखमस्वाप्समिति ज्ञानस्य प्रत्यभिज्ञारूपत्वं स्वरसतः प्रतीयते, स्वापकालांशे च प्रत्यभिज्ञारूपत्वासम्भवेऽपि सुखविशिष्टात्मांशे तत्स्वरूपतासम्भवात्प्रतीतिस्वारस्यानुरोधेन ज्ञानद्वयरूपताकल्पनं युक्तम् । यथा—प्रातश्चत्वरे गजो नासीदिति ज्ञानं ज्ञानद्वयात्मकं; तत्र हि प्रातश्चत्वरमात्रमनुभूतं, न गजाभावः; प्रतियोगिभूतगजास्मरणात्। पश्चात्तु गजः किं स्थित इति पृष्टे योग्यार्था-

स्मरणलिङ्गेन गजाभावोऽनुमीयते । पूर्वोक्तरीत्या कालोऽपि तद्वत् ॥ —इत्याहुः ॥

न च—उक्तज्ञानस्यात्मांशेऽपि प्रत्यभिज्ञारूपत्वं न सम्भवति, संस्कारजन्यप्रत्यक्षस्यैव प्रत्यभिज्ञारूपत्वादात्मस्वरूपात्मकानुभवस्य नित्यत्वेन तस्य संस्कारजनकत्वाकल्पनात् चिरातीतस्य अनुभवस्य कालान्तरभाविस्मरणजनकतानिर्वाहार्थमेव द्वारतया संस्कारस्यानित्यानुभवस्थले कल्पनीयत्वान्नित्यानुभवस्थले च तत्कल्पनस्य विफलत्वादिति—वाच्यम् ; स्वजन्यसंस्कारवत्तासम्बन्धेनानुभवस्य नित्यानित्यसाधारण्येनैकहेतुतानिर्वाहाय नित्यानुभवस्थलेऽपि संस्कारकल्पनस्यावश्यकत्वात् ; अन्यथा नित्यानुभवस्य साक्षादनित्यानुभवस्य च परम्परया हेतुत्वमिति कार्यकारणभावद्वयापत्तेः ॥

अयं चात्मा कर्ता ; भोक्तृत्वात्, चेतनोऽहं करोमीति प्रतीत्या आत्मनि कृत्याश्रयत्वरूपकर्तृत्वस्य प्रत्यक्षसिद्धत्वाच्च । न च—जपाकुसुमस्थं लौहित्यं स्फटिक इवान्तःकरणगतं कर्तृत्वमात्मन्यध्यस्यते, न तु तात्त्विकं ; निर्विकारत्वश्रुतिविरोधात्, सुषुप्तौ बुद्ध्यभावे कर्तृत्वादर्शनाच्चेति—वाच्यम् ; तथा सति रक्तं कुसुममितिवत्कदाचित् मनः कर्त्रिति प्रमा, लोहितस्स्फटिक इतिवच्चैतन्यं कर्त्रिति भ्रमश्च स्यात् ; सुषुप्तावन्तःकरणाभावेऽप्यात्मनि श्वासादिकर्तृत्वदर्शनात् सुषुप्तौ भूर्भुवरित्येव श्वसितीति श्रुतेश्च, आत्मनि कर्तृत्वस्याप्यौपाधिकत्वासम्भवात्। किञ्च—आत्मनोऽकर्तृत्वे बुद्धिरेव श्रवणादिकर्त्रीति तस्या एव तत्फलं मोक्षोऽपि स्यात् ; शास्त्रफलं प्रयोक्तरीतिन्यायात्, अन्यथाऽतिप्रसङ्गात्। न च—जातेष्टिपितृयज्ञयोर्व्यभिचारान्न कर्तुरेव फलभाक्त्वनियम इति—वाच्यम्, तत्रापि पूतपुत्रकत्वस्वर्गभागिपितृकत्वयोः कर्तृगतयोरेव फलत्वात् । एवं तन्मनोऽकुरुतेति श्रुतौ मनसः कृतिकर्मत्वस्य 'शृण्वन्तश्श्रोत्रेण विद्वांसो मनसा' इत्यादिश्रुतौ 'शरीरवाङ्मनोभिर्य-

त्कर्म प्रारभते नरः।' इति स्मृतौ च करणत्वस्य प्रतिपन्नत्वेन कर्तृत्वासम्भवात्; कर्तृत्वकर्मत्वयोरेकत्रासम्भवस्य 'कर्तृकर्मव्यपदेशाच्च' इति सूत्रसिद्धत्वात्। 'मन उदक्रामन् मिलित इवाश्नन्पिबन्नास्ते वा' इत्यादिश्रुतौ मनस उत्क्रमणेऽप्यात्मनः कर्तृत्वस्य, तथा—

"परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते, स तत्र पर्येति
जक्षन्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ॥"

इत्यादिस्वरूपाविर्भावरूपमुक्तावपि कर्तृत्वस्य प्रतिपन्नत्वेन नास्यौपाधिकतासम्भवः। तच्च कर्तृत्वं परमपुरुषहेतुकमिति—**कर्ता शास्त्रार्थवत्त्वात्, परात्तु तच्छ्रुतेः**—इत्यधिकरणयोः प्रपञ्चितम् ॥

न च—जीवकृतिसामान्यस्येश्वरकृतिजन्यत्वे कलञ्जभक्षणादिकर्तुरपि पापाद्यनुपपत्तिः, आश्रयतासम्बन्धेन पापं प्रति स्वानुकूलकृतिमत्त्वसम्बन्धेन कलञ्जभक्षणादेर्हेतुत्वे बलात्कलञ्जभक्षणं कारिते पुरुषे पापापत्तिवारणाय स्वानुकूलकृतावितरकृत्यजन्यत्वनिवेशस्यावश्यकत्वादितरकृत्यजन्यस्वानुकूलकृतिमत्त्वसम्बन्धेन कलञ्जभक्षणादेस्तादृशकर्तृत्वाभावादिति—वाच्यम्; जीवकृतिसामान्यस्येश्वरसङ्कल्पजन्यत्वेन तत्कृतिजन्यत्वानङ्गीकारात्, तदङ्गीकारेऽपीतरकृतिनिष्ठासाधारणकारणताकान्यत्वस्यैव निवेशादीश्वरकृतेश्च साधारणकारणत्वेनादोषात् ॥ न च—

'एष ह्येव साधु कर्म कारयति, तं यमेभ्यो लोकेभ्य उन्निनीषति। एष एवासाधुकर्म कारयति, तं यमधो निनीषति ॥'

इति श्रुत्या,

"अज्ञो जन्तुरनीशोऽयमात्मनस्सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥"

इति स्मृत्या च जीवनिष्ठसाधुकर्मानुकूलकृतिं प्रति उन्निनीषाजन्यभगवद्यत्नस्य, असाधुकर्मानुकूलकृतिं प्रति चाधोनिनीषाजन्यभगवद्यत्नस्य

हेतुतावोधनात्, भगवत्कृतिनिष्ठासाधारणकारणताकत्वमेव जीवकृतावस्तीति–वाच्यम्; साधुकर्मकारयितृत्वश्रुतेरतिमात्रभगवदानुकूल्यप्रसक्तपुरुषविशेषविषयत्वेनासाधुकर्मकारयितृत्वश्रुतेश्चातिमात्रप्रातिकूल्यप्रसक्तपुरुषविशेषविषयत्वेन सर्वविषयत्वाभावात्तदतिरिक्तपुरुषकृतौ भगवत्सङ्कल्पादेस्साधारणकारणतयैव निर्वाहे असाधारणकारणत्वाकल्पनात्। न चैवमप्यतिमात्रप्रातिकूल्यप्रसक्तपुरुषे पापोत्पत्त्यनुपपत्तिरिति वाच्यम्; ईश्वरभिन्नेतरकृत्यजन्यत्वस्यैव स्वानुकूलकृतौ निवेशेन तादृशपुरुषेऽपि निषिद्धानुष्ठानस्य पापजनकत्वोपपत्तेः। न च–सिद्धान्ते पुण्यपापयोर्भगवदनुग्रहनिग्रहरूपतया निषिद्धानुष्ठातरि भगवन्निग्रहानुपपत्तिस्तदवस्थैव; विषयतासम्बन्धेन तत्पुरुषीयनिग्रहं प्रति तत्पुरुषानभिमतकरणस्य हेतुत्वे अयमस्मदनभिमतं कुर्यादितीच्छादशायां तस्य निग्रहजनकत्वादर्शनेन, तत्पुरुषीयेच्छाविरहविशिष्टतत्पुरुषानभिमतकरणस्य तत्पुरुषीयनिग्रहजनकत्वस्य वाच्यत्वात्, कलञ्जभक्षणादेर्भगवदनभिमतत्वेऽपि तदनुकूलकृतेर्भगवदिच्छाविरहविशिष्टत्वाभावाद्भगवत्सङ्कल्पात्मकतादृशेच्छाविरहे तादृशकृतेरेवोत्पत्त्यनुपपत्तेरिति–वाच्यम्; अयं यत्किञ्चित्कार्यं कुर्यादित्यादीच्छासत्त्वे राजाद्यनभिमतकरणस्य राजनिग्रहजनकत्वदर्शनेन तत्तत्कार्यं कुर्यादित्यादिरूपविशेषाकारेच्छाविरहस्यैव निग्रहजनकतावच्छेदकगर्भे निवेश्यत्वात्। प्रकृते चायं कलञ्जं भक्षयेदिति विशेषाकारायाः भगवदिच्छाया अभावादयं स्वेष्टं कुर्यादिति सामान्यसङ्कल्पेनैव तादृशकृत्युपपत्तेः, तदर्थं विशेषसङ्कल्पानावश्यकत्वादिति दिक्॥

जीवो द्विविधः—संसार्यसंसारिभेदात्। पुण्यपापान्यतरत्वत्वं **संसारिणो लक्षणम्॥**

संसार्यपि द्विविधः–नित्यानित्यसंसारिभेदात्। पुण्यपापान्यतरत्वावच्छिन्नाभाववदन्यत्वं–**नित्यसंसारिलक्षणम्**। स्वपूर्वकालीनत्व-

स्वसामानाधिकरण्योभयसम्बन्धेन तादृशान्यतरत्वावच्छिन्नाभाव-विशिष्टतादृशान्यतरवत्त्वं—**अनित्यसंसारिलक्षणम्**। नित्यसंसारि-सद्भावे प्रमाणं तु 'अव्युच्छिन्नास्ततस्त्वेते सर्गास्थित्यन्तसंयमाः।' इत्यादिरूपा लीलाविभूतिनित्यतोक्तिः। 'क्षिपाम्यजस्रमशुभाना-सुरीष्वेव योनिषु' 'न क्षामामि कदाचन'—इत्यादिकं च॥

परे तु—क्षिपाम्यजस्रमित्यादेर्विलम्बातिरेकपरत्वान्नित्यसंसारिसद्भावे प्रमाणाभाव एव। विमतो जीवो मोक्षसाधनज्ञानवान्, जीवत्वात्, सम्प्रतिपन्नजीववत्—इत्यनुमानेन जीवत्वावच्छेदेन मुक्तियोग्यतासिद्धौ नित्यसंसार्यसम्भवात्। अन्यथा सर्वेषां स्वस्मिन् नित्यसंसारित्वसन्देह-सम्भवेन मोक्षसाधनानुष्ठाने कस्यापि प्रवृत्तिर्नस्यादिति श्रवणादि-विधिवैयर्थ्यापत्तिः; संसारिणामनन्तत्वाच्च सर्वेषां मुक्तियोग्यत्वेऽपि लीलाविभूतिनित्यतोपपत्तिः॥ न च—संसारिणामनन्तत्वे 'पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि' इति संसार्यसंसारिजीवानां एकपादत्वत्रिपादत्वतारतम्यकथनं नोपपद्यत इति—वाच्यम्; मुहूर्तयामाहोरात्रकल्पादीनामानन्त्यस्य समानत्वेऽपि—यथा कल्पा-पेक्षयाऽहोरात्रादीनामाधिक्यं तदपेक्षया च मुहूर्ताधिक्यं, यथा वा सतां द्रव्याणां च आनन्त्येऽपि द्रव्यानन्त्यापेक्षाया सदानन्त्याधिक्यं तद्वदुपपत्तेः॥ —इत्याहुः॥

असंसारी द्विविधः—नित्यमुक्तभेदात्। पुण्यपापान्यतर-वद्भिन्नत्वे सत्यणुत्वं **नित्यानां लक्षणम्**। ईश्वरवारणायाणुत्वनिवेशः, ते चानन्तगरुडविष्वक्सेनादयः। 'सदा पश्यन्ति सूरयः' इत्या-दिभिस्सदापश्यदनेकद्रष्टृविशिष्टस्थानविधानान्नित्यसूरिसद्भावसिद्धिः। न चोक्तश्रुतेर्मुक्तप्रवाहविषयत्वमीश्वरविषयत्वं वाऽस्त्विति वाच्यम्; सदापदार्थस्य कालत्वव्यापकत्वस्य मुक्तदर्शने बाधाद्भगवति बहु-वचनार्थबहुत्वानुपपत्तेः। स्वसामानाधिकरण्यस्वसमानकालीनत्वोभय-

सम्बन्धेन कर्मप्रागभावविशिष्टान्यकर्मध्वंससमानाधिकरणपरमात्मानुभवरूपो यो मोक्षस्तद्वत्त्वं—मुक्तलक्षणम् ॥

मोक्षहेतुश्च परविद्या; परविद्यात्वं च ब्रह्मविषयकविद्यात्वं, विद्यात्वं च वेदविहितभक्तित्वम्। वेदविहितत्वनिवेशादुदासीनस्मृतिसन्ततौ नातिव्याप्तिः। वेदविहितत्वं च वेदतात्पर्यविषयीभूतकृतिसाध्यत्वादिप्रकारकबोधविषयत्वं; 'स आत्मानमुपासीत मनोमयं प्राणशरीरम्' इत्यादौ लिङः कृतिसाध्यत्वार्थकत्वात्, वेदार्थसङ्ग्रहे 'लिङः कोऽर्थः परिगृहीतः' इति प्रश्नपूर्वकं 'यज देवपूजायामिति देवताराधनभूतयागादेः कर्तृव्यापारसाध्यतां व्युत्पत्तिसिद्धां लिङादयोऽभिदधति' इत्युक्तेः ; वेदतात्पर्यविषयीभूतकृतिसाध्यत्वप्रकारकबोधविषयत्वं शाण्डिल्यविद्यादावस्तीति लक्षणसङ्गतिः, मनोमयत्वादिप्रकारकात्मविशेष्यकं यत्कृतिसाध्यमुपासनं तत्कर्तेति बोधस्य तद्वाक्यादुत्पत्तेः; कर्त्रधिकरणदीपादावाख्यातार्थमुख्यविशेष्यकबोधस्योक्तत्वात्, लिङो लिङ्त्वेन कृतिसाध्यत्वार्थकत्वस्य आख्यातत्वेन कर्त्रर्थकतायाश्च सम्भवात्। बोधे वेदजन्यत्वमनिवेश्य वेदतात्पर्यविषयत्वनिवेशात्सद्विद्यादौ नाव्याप्तिः ; तत्र सदुपासीतेति विध्यभावेऽपि 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ सम्पत्स्ये' इति मोक्षसाधनत्वश्रवणेन विधिकल्पनस्यावश्यकतया सदुपासनविशेष्यककृतिसाध्यत्वप्रकारकबोधस्यापि सद्विद्यातात्पर्यविषयत्वात् । अत एवोद्गीथविद्याविचारे भाष्ये उक्तं—

"वेदनविषयविधिप्रत्ययाश्रवणेऽपि फलसाधनत्वश्रवणाद्वेदनविषये विधिः कल्प्यते ॥" —इति ॥

वेदतात्पर्यं च वेदोच्चारणप्रयोजकेच्छा, न तु वेदकर्मकाद्योच्चारणप्रयोजकेच्छा; वेदस्यापौरुषेयत्वेन तत्कर्मकाद्योच्चारणस्यैवाप्रसिद्धेः। सा चेच्छा क्वचिदीश्वरसमवेता, क्वचिदध्यापकसमवेता च प्रसिध्यतीति

नाप्रसिद्धिः। भक्तित्वं च प्रीतिरूपतापन्नदर्शनसमानाकारध्रुवानुस्मृतिरूपध्यानत्वम्; प्रीतित्वं चानुकूलत्वप्रकारकत्वं; अनुकूलत्वं च—यद्धर्मावच्छिन्नविषयता इतरेच्छानधीनेच्छाजनकतावच्छेदिका, तादृशधर्मरूपं वैजात्यं। इच्छायामितरेच्छानधीनत्वनिवेशादिष्टसाधनत्वव्युदासः। दर्शनसमानाकारत्वं च—साक्षात्कारत्वव्यञ्जकविषयितावत्त्वम्। अनवरतभावनावशात् स्मृतावपि तादृशविषयिता जायते, 'वृक्षे वृक्षे च पश्यामि चीरकृष्णाजिनाम्बरौ' इत्यादौ तथा दर्शनात्॥ यद्यपि—इदं रजतमित्यादाविव वृक्षविशेष्यकं रामादिप्रकारकं ज्ञानं भ्रमात्मकसाक्षात्कार एव; तथाऽपि—सिद्धान्ते असन्निकृष्टभ्रमस्थले ग्रहणस्मरणात्मकज्ञानद्वयस्य तदीयविषयतयोर्निरूप्यनिरूपकभावस्य च स्वीकारात्स्मरणस्यैव लौकिकविषयितावत्त्वमभ्युपगन्तव्यं; अन्यथा पश्यामीत्यत्यानुपपत्तेः। स्पष्टं चेदं **ज्ञानयाथार्थ्यवादार्थे**॥

न च—एवमपि कामातुरपरिभावितकामिनीसाक्षात्कारवत् ब्रह्मध्यानस्यापि भ्रमत्वापत्तिः, भावनारूपदोषजन्यत्वात्, उक्तस्थले भावनाया दोषत्वेन कृप्तत्वादिति—वाच्यम्; न हि भावनाजन्यत्वमुक्तकामिनीसाक्षात्कारे अप्रामाण्यप्रयोजकं, किं तु बाधितविषयत्वं; भावनानपेक्षेऽपि शुक्तिरजतादिभ्रमे बाधादेवाप्रामाण्यस्वीकारात्, ब्रह्मणश्च सर्वव्याप्तस्य सर्वप्रमाणाबाधितत्वात्तद्भावनाजन्यज्ञानस्यापि प्रामाण्याविधानात्, भावनायाश्च व्यवहितकामिनीसाक्षात्कारे दोषत्वेऽपि ब्रह्मध्याने दोषत्वासम्भवात्; अन्यथा शङ्खपीतत्वभ्रमकारणीभूतस्य पित्तद्रव्यस्य स्वविषयकज्ञानेऽप्यप्रामाण्यप्रयोजकत्वापत्तेः, क्वचिदेव कस्य चिद्दोषत्वमित्येवाङ्गीकार्यत्वात्॥ ध्रुवानुस्मृतित्वं च—घटिकाद्यात्मककालनिष्ठावान्तरकालावच्छिन्नाभावाप्रतियोगित्वं, धारावाहिकप्रत्यक्षस्थल इव तावत्पर्यन्तमेकस्या एव स्मृतिव्यक्तेस्स्वीकारात्॥

उक्तं च **प्रज्ञापरित्राणे वरदनारायणभट्टारकैः**—

"स्तम्भस्तम्भस्तम्भ इति धीर्धारावाहिका मता ।
धारावाहिकविज्ञानमेकं ज्ञानं मतं हि नः ॥" —इति ॥

यदि च—धारावाहिकज्ञानस्थले नैका व्यक्तिः, किं तु सजातीय-ज्ञानधारैव । उक्तं च श्रीमति भाष्ये—"ध्यानं च तैलधारावदविच्छिन्नस्मृतिसन्तानरूपा ध्रुवानुस्मृतिः" इति—**इत्युच्यते; तदा**—घटिकाद्यात्मककालनिष्ठावान्तरकालावच्छिन्नो यस्त्वाश्रयत्वस्वसमानविषयकस्वसमानाधिकरणस्मृत्याश्रयत्वैतदन्यतरसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावस्तादृशाभावाप्रतियोगित्वं ध्रुवानुस्मृतित्वमिति बोध्यम् । ब्रह्मविषयकत्वं च सत्यत्वज्ञानत्वानन्दत्वामलत्वनिष्ठप्रकारतानिरूपित-ब्रह्मनिष्ठविशेष्यत्वाकत्वम् । तेन मनो ब्रह्मेत्युपासीतेत्यादिनाभिहितेषु प्रतीकोपासनेषु नातिव्याप्तिः । परविद्यासामान्ये सत्यत्वादिप्रकारकत्वं च—**आनन्दादयः प्रधानस्य, इतरे त्वर्थसामान्यादिति** सूत्रसिद्धम्॥

सा च विद्या—सदानन्दमयान्तरादित्यशाण्डिल्यदहरमधुभूमवैश्वानर-पञ्चाग्न्यादिविद्याभेदाद्बहुविधा ॥ तत्र—जगदुपादानत्व-जगन्निमित्तत्व-सत्यसङ्कल्पत्व-तेजःप्रभृतिस्रष्टृत्व-तत्तच्छरीरकत्व-तत्तदनुप्रवेष्टृत्व—नामरूपव्याकर्तृत्व—जगज्जन्मस्थितिलयहेतुत्वादिगुणप्रकारकसच्छब्द-वाच्यपरब्रह्मविशेष्यकोपासनं—**सद्विद्या** । सा च—सदेव सोम्येदमग्र आसीदित्यादिना छान्दोग्ये प्रतिपादिता ॥ विपश्चित्त्व-जगत्कारणत्वानन्दैकतानत्वेतरानन्दयितृत्व-स्वसङ्कल्पप्रयोज्यचिदचिदात्मकप्रपञ्चस्रष्टृत्व-सृज्यवर्गानुप्रवेशकृततदात्मकत्व-भयाभयहेतुत्व-वाच्यादित्यादिप्रशासितृत्व निरतिशयानन्दाश्रयत्वादिप्रकारकानन्दमयविशेष्यकभक्तिः—**आनन्दमयविद्या** । सा च तैत्तिरीयकगता ॥ मनोमयत्व-प्राणशरीरकत्व-भारूपत्व-सत्यसङ्कल्पत्वाकाशशरीरकत्व—सर्वगन्धत्व-सर्वरसत्वावाप्तसमस्तकामत्वावाक्यित्वानादरत्व-हृदयोपाधिकाणु-

त्वादिप्रकारकात्मविशेष्यकोपासनं–**शाण्डिल्यविद्या** । सा च छान्दोग्ये बृहदारण्यकेऽग्निरहस्ये चाम्नाता ॥

अथ–बृहदारण्यके सत्यसङ्कल्पत्वाद्यप्रतिपादनात्तत्प्रकारकत्वघटितोक्तलक्षणस्य तदुक्तशाण्डिल्यविद्यायामव्याप्तिः । न च–सत्यसङ्कल्पत्वादिप्रकारकत्वमनिवेश्य मनोमयत्वभारूपत्वहृदयोपाधिकाणुत्वैतत्त्रितयप्रकारकत्वमेव लक्षणे निवेश्यत इति नाव्याप्तिः, उक्तगुणत्रयस्य छान्दोग्येऽग्निरहस्ये बृहदारण्यके च सत्त्वादिति–वाच्यम्। शाण्डिल्यविद्यायां उक्तगुणत्रयप्रकारकत्वेनैव कारणत्वे छान्दोग्याग्निरहस्ययोः प्राणशरीरकत्वसत्यसङ्कल्पत्वादीनां प्रतिपादनस्य वैयर्थ्यप्रसङ्गेन प्राणशरीरकत्वादिप्रकारकत्वस्यापि कारणतावच्छेदकत्वावश्यकत्वात् बृहदारण्यकोक्तशाण्डिल्यविद्यायास्तत्प्रकारकत्वाभावे मोक्षजनकत्वानुपपत्तेः । न च–**सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्** इत्यादिना रूपैक्यस्य विद्यैक्यप्रयोजकतया गुणोपसंहारप्रयोजकत्वाभिधानात् प्रकृते मनोमयत्वभारूपत्वविशिष्टात्मन एव बृहदारण्यकेऽप्युपास्यत्वोक्त्या रूपैक्याद्गुणोपसंहारावश्यकत्वेन तद्विद्याया अपि प्राणशरीरकत्वादिप्रकारकत्वान्मोक्षजनकतासम्भव इति–वाच्यम्। विद्यैक्यस्य तत्प्रयोजकरूपैक्यस्य च बृहदारण्यकोक्तविद्यायामसम्भवात् । तथा हि–विद्यैक्यं च न तावदभिन्नत्वं; पुरुषभेदेन कालभेदेन च भिन्नानां मनोमयत्वादिप्रकारकोपासनरूपशाण्डिल्यविद्यानामभेदायोगात्; किन्त्वभिन्नकारणताश्रयत्वं, शाण्डिल्यविद्यानां सर्वासामेकरूपेण कारणत्वात्; एकविषयतावत्त्वं वा, समानाकारज्ञानेषु विषयताया ऐक्यात् । तत्प्रयोजकं रूपैक्यमपि न तावदेकविशेष्यकत्वम्, उद्गीथविद्यानां सर्वासामप्युद्गीथात्मकैकविशेष्यकत्वेनैक्यापत्तेः । किं तु तदनिवर्त्यसंशयनिवर्तकतावच्छेदकविषयताशून्यत्वरूपं तदनतिरिक्तविषयकत्वमेव तदैक्यप्रयोजकं रूपैक्यम् ।

तथा च–"तत्रापि दहरं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्" इति तैत्तिरीयकगता दहरविद्या छान्दोग्यगतदहरविद्यानिष्ठकारणतावती तन्निष्ठविषयितावती वा, तादृशविद्यानिष्ठप्रतिबन्धकताकान्यसंशयनिवर्तकतावच्छेदकविषयिताशून्यत्वात्, छान्दोग्यगतदहरविद्यावत् इत्याद्यनुमानेन भिन्नभिन्नशाखागतविद्यानामैक्यं साधनीयमिति सर्ववेदान्तप्रत्ययन्यायाभिप्रेतम् । तथा च–बृहदारण्यकगतशाण्डिल्यविद्याया अग्निरहस्याद्युक्तशाण्डिल्यविद्यैक्यं न सम्भवति, तादृशोपासनाप्रतिबध्यवशित्वेशानत्वादिकोटिकसंशयनिवर्तकतावच्छेदकविषयितावत्त्वेन तच्छून्यत्वात्मकरूपैक्याभावात् ॥ —इति चेत् ॥

मैवम्–सर्वस्थितिप्रयोजकसङ्कल्पवत्त्वरूपवशित्वस्य सर्वोत्पत्तिप्रयोजकसङ्कल्पवत्त्वरूपसर्वेशानत्वस्य सर्वचेष्टाप्रयोजकसङ्कल्पवत्त्वरूपसर्वप्रशासितृत्वस्य च बृहदारण्यकोक्तस्य अग्निरहस्यच्छान्दोग्ययोस्सत्यसङ्कल्पपदेनोक्तत्वात् सत्यपदस्य सर्वस्थितिप्रयोजकत्व–सर्वोत्पत्तिप्रयोजकत्व-सर्वचेष्टाप्रयोजकत्वपरत्वात् । सर्वनिष्ठस्वत्वनिरूपकत्वरूपसर्वाधिपतित्वस्य च सर्वं स्वामितया प्राप्तवानित्यर्थकेन सर्वमिदमभ्यात्त इत्यनेनोक्तत्वेन बृहदारण्यकोक्तविद्यायां रूपैक्यनिर्वाहात् । स्पष्टं चेदं 'समान एवं चाभेदात्' इत्यत्र भाष्ये ॥

अथ–एवमपि छान्दोग्यादौ ज्यायान्पृथिव्या इत्यादिना ज्यायस्त्वस्योक्तया तत्प्रकारकत्वस्यापि हेतुतावच्छेदकत्वमावश्यकं, अन्यथा तत्प्रतिपादनवैयर्थ्यात् । तच्च–न सम्भवति, हृदयावच्छिन्नपरमात्मनि पृथिव्याद्यवधिकज्यायस्त्वासम्भवात् ॥ न च–तादृशज्यायस्त्वस्यावच्छिन्ने असम्भवेऽपि स्वरूपे सम्भवान्नानुपपत्तिः; एवं चानन्दादय इत्यस्यापि न विरोधः, हृदयावच्छिन्नपरमात्मन्यपि स्वरूपे अपरिच्छिन्नत्वरूपानन्त्यस्य सम्भवेन तत्प्रकारकत्वनिर्वाहादिति–वाच्यम् । तथा सति "सम्भृतिद्युव्याप्त्यपि चातः" इत्यधिकरणविरोधापत्तेः, तत्र

हृदयादिरूपाल्पस्थानगोचरासु विद्यासु द्युव्याप्तिप्रकारकत्वासम्भवस्य प्रतिपादनात्, उक्तरीत्या द्युव्याप्तेर्हृदयावच्छिन्ने असम्भवेऽपि स्वरूपे सम्भवात् ॥ न च—द्युव्याप्तिराकाशावधिकमहत्त्वं ; तच्च स्वरूपे न सम्भवति, स्वरूपगतपरममहत्त्वस्य निरवधिकत्वेनाकाशाद्यवधिकत्वाभावात्; मध्यमपरिमाण एवान्यापेक्षयाऽल्पत्वरूपत्वस्येतरापेक्षया महत्त्वरूपत्वस्य चोपपत्त्यर्थं सावधिकत्वकल्पनादिति—वाच्यम्। तथा सति पृथिव्याद्यवधिकज्यायस्त्वस्यापि शाण्डिल्यविद्याप्रकारत्वासम्भवतादवस्थ्यात्, आनन्दादय इतिसूत्रोक्तानन्त्यस्यैव स्वरूपांशे प्रकारतया भानसम्भवात्—**इति चेन्न** ॥ ज्यायान्पृथिव्या इत्यादेरुपास्यमाहात्म्यप्रतिपादनपरत्वेन शाण्डिल्यविद्यावेद्यत्वानुपगमात्, सम्भृत्यधिकरणभाष्ये तथा प्रतिपादनादिति दिक्। उक्तरीत्यैव विद्यान्तराणां लक्षणान्यूह्यानि ॥

तासां च विद्यानां तृणाराणिमणिन्यायेन पृथगेव हेतुत्वं, न तु दण्डचक्रादिन्यायेन मिलितानां हेतुत्वमिति **विकल्पोऽविशिष्टफलत्वा**दिति सूत्रसिद्धम्; दहरादिविद्यागतमोक्षोत्पादप्रयोजकतावच्छेदकसमुदायत्वशून्यत्वे सति मोक्षोत्पादप्रयोजकतावच्छेदकसमुदायाश्रयत्वरूपभिन्नसामग्रीप्रविष्टत्वस्यैव विकल्पशब्दार्थत्वात्, अव्यवहितोत्तरत्वनिवेशाच्च—न परस्परं व्यभिचार इति बोध्यम्। अत्र अविशिष्टफलत्वादिति सूत्रयता मुक्तावानन्दतारतम्यं निरस्तं; ब्रह्मविद्यासामान्यस्यैकजातीयफलजनकत्वाभिधानात्, भोगमात्रसाम्यलिङ्गाच्चेति सूत्रोक्तस्य भोगसाम्यस्य सम्भवाच्च। तथा हि—अनुकूलत्वप्रकारकसाक्षात्कारो भोगः, तत्साम्यं च समानविषयकत्वम्। तथा च प्रमेयत्वव्यापकानुकूलत्वनिष्ठप्रकारतानिरूपितविशेष्यताकसाक्षात्कारवत्त्वमेव समानभोगवत्त्वम्, 'सदा पश्यन्ति सूरयः' इत्यनेन नित्यानां, 'सर्वं ह पश्यः पश्यति' इत्यनेन मुक्तानां चेश्वरस्येव सर्वसाक्षात्कारवत्त्व-

बोधनात्तदंशे वैलक्षण्याभावात् परस्परमीश्वरेण च भोगसाम्यमुपपन्नम्।
उक्तं च तत्त्वमुक्ताकलापे—

"शेषाणां शेषिणश्च स्फुरति सुखतया सर्वदा सर्वतत्त्वे
नित्यानां मुक्तिभाजामपि भुवनकृतं भोगमात्रं समानम् ॥"
—इति ॥

न च—मुक्तानां दुःखादिसाक्षात्कर्तृत्वे दुःखित्वापत्त्या न सर्वसाक्षात्कारसम्भवः ; 'न पश्यो मृत्युं पश्यति, न रोगं नोत दुःखताम्' इति श्रुत्या दुःखादिसाक्षात्कारनिषेधाच्च, 'सर्वं ह पश्यः पश्यति' इत्यस्य सङ्कोचावश्यकत्वादिति—वाच्यम् । स्वतोऽनुकूलभूतभगवद्विभूतित्वेन सर्वस्याप्यनुकूलत्वेन दुःखादेरपि मुक्तान्प्रति प्रतिकूलत्वाभावेनानुकूलतया दुःखादिसाक्षात्कर्तृत्वसम्भवात्तस्य दुःखित्वानापादकत्वात् प्रतिकूलतया तत्साक्षात्कर्तृत्वस्यैव तथात्वात्, स्वतोऽनुकूलभूते वस्तुनि प्रातिकूल्यस्य कर्मकृतत्वेन कर्मनाशे तत्कृतप्रातिकूल्यस्यासम्भवात्, नोतदुःखतामित्यस्य प्रातिकूल्यप्रकारकसाक्षात्कारनिषेधपरत्वेन दुःखसाक्षात्कारनिषेधपरत्वाभावाच्च ॥ न च—पूर्वानुभूतनरकादौ प्रातिकूल्यस्य पूर्वं स्थितत्वादतीतादिसाक्षात्कर्तुर्मुक्तस्य तत्साक्षात्कर्तृत्वमावश्यकमिति—वाच्यम् । प्रतिकूलतया अनुभूतं नरकादिकमपि भगवद्विभूतित्वादनुकूलमेवेति साक्षात्कारस्य मुक्तिदशायां स्वीकारेऽपि तस्य दुःखित्वानापादकत्वात्, प्रत्युतानन्दावहत्वात् ॥

अत्र माध्वाः—देवमनुष्यादीनां मुक्तानां परस्परमानन्दे तारतम्यमावश्यकम्; साधनतारतम्यस्य साध्यतारतम्यप्रयोजकत्वात्, मनुष्योपासनापेक्षया देवोपासनस्य कालतो विषयतश्च प्रकृष्टत्वात्, अन्यथा प्रयत्नाधिक्यवैफल्यापत्तेः, प्रकृष्टाप्रकृष्टसाधनवतामेकजातीयफलप्रदत्वे भगवतो वैषम्यापत्तेश्च । श्रुतिसिद्धश्चायमर्थः—

"अक्षण्वन्तः कर्णवन्तस्सखायो मनोजवेष्वसमा बभूवुः ॥"—इति ॥ अत्र हि मनोजवशब्दिते ज्ञाने साम्याभावप्रतिपादनात्तारतम्यमवगम्यते, तेन च फलतारतम्यमर्थसिद्धम्। तथा 'सैषानन्दस्य मीमांसा भवति'—इत्यारभ्य मनुष्यादिचतुर्मुखपर्यन्तानां मुक्तानामानन्दतारतम्यं प्रतिपाद्य 'श्रोत्रियस्य चाकामहतस्य' इति तत्तन्मुक्तेष्वपि तत्तदानन्दतारतम्यातिदेशात्, परमसाम्यश्रुतेश्च भवन्मतेऽपि नासङ्कुचितार्थत्वं; जगत्कारणत्वलक्ष्मीपतित्वादेर्मुक्तेष्वसम्भवाच्छेषित्वशेषत्वाणुत्वविभुत्वादिकृततारतम्यस्य दुरपह्नवत्वाच्च । अतो निर्दोषत्वमात्रेण तत्साम्यमुपपन्नमिति न तेनानन्दसाम्यसिद्धिः—इति वदन्ति ॥

अत्रोच्यते—मुक्तानामानन्दतारतम्यं सङ्ख्याकृतं परिमाणकृतं विषयकृतं स्वरूपकृतं वा न सम्भवति ॥ **सङ्ख्याकृततारतम्यं हि**—एकतरकृतमुक्तानन्दपर्याप्तसङ्ख्याव्याप्यत्वव्यापकत्वान्यतरावच्छेदकसङ्ख्याविभाजकधर्मवत्सङ्ख्यापर्याप्तचधिकरणत्वमपरमुक्तानन्देषु। यथा अष्टवस्वपेक्षया सप्तर्षिषु द्वादशादित्येषु च वसुपर्याप्ताष्टत्वसङ्ख्याव्याप्यतावच्छेदकसप्तत्वत्वरूपसङ्ख्याविभाजकधर्मवत्सङ्ख्यापर्याप्तचधिकरणत्वस्य सप्तर्षिषु तादृशसङ्ख्याव्यापकतावच्छेदकद्वादशत्वत्वरूपतादृशधर्मवत्सङ्ख्यापर्याप्तचधिकरणत्वस्य द्वादशादित्येषु च सत्त्वात्। एतादृशं च तारतम्यं मुक्तानन्देष्वसम्भवि ; आनन्दस्य भवन्मते जीवस्वरूपत्वेन प्रत्येकमेकत्वेन सङ्ख्याकृतवैषम्याभावात् ॥ **नापि परिमाणकृतं**, परिमाणकृततारतम्यं ह्यामलकापेक्षया बिल्वबदरयोस्तत्संयुक्तयावत्प्रदेशसंयोगयोग्यत्वसमानाधिकरणतदसंयुक्तप्रदेशसंयोगयोग्यत्वतत्संयुक्तयत्किञ्चित्प्रदेशसंयोगयोग्यत्वान्यतररूपं प्रसिद्धं ; तादृशस्याणुरूपजीवस्वरूपानन्देष्वसम्भवात् ॥ **नापि विषयकृतं** ; तद्धि तद्विषयत्वत्किञ्चिद्विषयकत्वतदविषयविषयकत्वान्यतररूपं ; यथा—घटपटोभयविषयकज्ञानापेक्षया एकविषयकज्ञानत्रितयविषयकज्ञानयोः ;

तादृशानन्दतारतम्यस्य, 'सर्वं ह पश्यः पश्यति' इत्यादिश्रुत्युक्त-सर्वज्ञत्वेन समानेषु मुक्तेष्वसम्भवात् ॥ नापि स्वरूपकृतं; तद्धि-मधुरमधुरतररसयोरिव परस्परासमानाधिकरणवैजात्यवत्त्वं, तादृशवैजात्यस्य मुक्तस्वरूपानन्देष्वप्रामाणिकत्वात् ॥

यदपि—तादृशवैजात्यसाधनायोक्तं—प्रकृता बन्धनिवृत्तिः स्वसजातीयबन्धनिवृत्त्याश्रयप्रतियोगिकतारतम्यवन्निष्ठा, बन्धनिवृत्तित्वात्, निगलबन्धनिवृत्तिवत्—इति। तदपि न—तारतम्यस्य गुणगतवैजात्यरूपस्य बन्धनिवृत्त्याश्रयात्मनिष्ठत्वाभावात्, तदवृत्तिधर्मस्यैतत्प्रतियोगितारतम्यशब्देनाभिधाने मुक्तानन्दयोरेकजातीयत्वेऽपि स्वस्वमात्रविषयकधीविषयत्वमादायार्थान्तरात्। न च—गुणगुणिनोरभेदाङ्गीकाराद्गुणगतवैजात्यस्य आत्मनिष्ठत्वमिति—वाच्यम्; स्वरूपातिरिक्ततादृशवैजात्यस्यापसिद्धान्तपराहतत्वेन भवद्भिरङ्गीकर्तुमशक्यत्वात्। न च—जीवस्वरूपानन्दानामनादितारतम्यस्वभावत्वमिति—वाच्यम्; जीवस्वरूपाणां तारतम्यस्वरूपत्वे भेदमात्रे पर्यवसानेन परिभाषामात्रापत्तेः, पूर्वोक्तभोगसाम्याविघातात्। साधनतारतम्यात्साध्यतारतम्यमित्यपि न सत्; धूमालोकादिलिङ्गकपरामर्शरूपसाधनतारतम्येऽप्यनुमितौ तारतम्यादर्शनेन व्यभिचारात्, मोक्षसाधनज्ञाने तारतम्यासिद्धेश्च अक्षण्वन्तइत्यादिश्रुतेस्सर्वसाक्षात्कर्तृत्वेन समान्तरराहित्यपरत्वादक्षण्वन्तःकर्णवन्तइत्याभ्यां सर्वसाक्षात्कर्तृचक्षुष्मत्त्वस्य तादृशश्रोत्रवत्त्वस्य च बोधनात्, प्रशंसायां मतुप्प्रत्ययात्; 'कीर्तिमानसमो राजा निस्तनास्तल पण्डिताः' इत्यादौ कीर्तिपाण्डित्याभ्यां सदृशान्तरराहित्यस्येव तादृशसाक्षात्कर्तृत्वेन सदृशान्तरनिषेधबोधनस्य युक्तत्वात्, सैषानन्दस्येत्यादिश्रुतेरपि शते पञ्चाशन्न्यायेन मुक्तानन्दे सर्वानन्दान्तर्भावपरत्वेन तारतम्यपरत्वाभावात्। तच्छ्रुतावानन्दपदं अनुकूलत्वेन ज्ञायमानविषयपरं, न तु तादृशज्ञानपरं; तथा सति

तादृशज्ञानस्य पुरुषभेदेन भिन्नतया मानुषानन्दे मनुष्यगन्धर्वसम्बन्धित्वोत्कीर्तनासङ्गतेः 'ते ये शतं मानुषा आनन्दास्स एकः' इत्यस्य मनुष्यानन्दशतसजातीय एको मनुष्यगन्धर्वानन्द इत्यर्थाङ्गीकारे त्वानन्दपदं तादृशज्ञानपरमेव । समानविषयकत्वेन साजात्यस्य विवक्षितत्वेन मानुषशतज्ञानविषयविषयकत्वस्य मनुष्यगन्धर्वगतैकज्ञाने लाभात्तादृशमनुष्यगन्धर्वगतविभिन्नविषयकशतज्ञानविषयविषयकत्वस्य च देवगतैकज्ञाने लाभान्नानुपपत्तिः; मुक्तानां सर्वविशेष्यकानुकूलत्वप्रकारकसाक्षात्कारवत्तया मानुषशतज्ञानविषयविषयकत्वस्य मनुष्यगन्धर्वादिगतशतज्ञानविषयविषयकत्वस्य च सत्त्वात्प्रतिपर्यायं श्रोत्रियस्य चाकामहतस्य इत्यस्योपपत्तिरित्यन्यत्र विस्तरः ॥

इत्यनन्तार्यकृतौ सिद्धान्तसिद्धाञ्जने

जीवनिरूपणं नाम द्वितीयः परिच्छेदः ॥

अथेश्वरो निरूप्यते ॥

विभुत्वे सति चेतनत्वं तल्लक्षणम् । जीववारणाय सत्यन्तं, कालवारणाय विशेष्यम् । प्रमेयत्वव्यापकस्वत्वनिरूपकत्वरूपं सर्वस्वामित्वं, सर्वकर्मजन्यप्रीत्याश्रयत्वरूपं सर्वकर्मसमाराध्यत्वं, सर्वकर्मफलोत्पादकसङ्कल्पवत्त्वरूपं सर्वफलप्रदत्वं, सर्वद्रव्यपतनप्रतिबन्धकसङ्कल्पवत्त्वरूपसर्वाधारत्वं च—**तल्लक्षणम्** । न च—ईश्वरस्य विभुत्वे 'अनुप्रविश्य नामरूपे व्याकरवाणि' इत्यादिश्रुत्युक्तमनुप्रवेशादिकं नोपपद्यत इति—वाच्यम्; विलक्षणसंयोगस्यैवानुप्रवेशशब्दार्थत्वात् । न च—भगवन्निरूपितस्वत्वस्य सर्वत्र सिद्धत्वे अग्नये स्वाहेत्यादावग्निपदस्याग्न्यन्तर्यामिपरत्वानुपपत्तिः, हविर्निष्ठस्वत्वरूपफलावच्छिन्नस्वस्वत्वध्वंसानुकूलव्यापारस्यैव स्वाहापदार्थत्वात्तन्न स्वत्वरूपफलेऽन्त-

र्यामिनिरूपितत्वासम्भवादिति–वाच्यम्; तत्र विशेषणीभूताग्निनिरूपित-त्वस्यैव स्वत्वरूपफलेऽन्वयाङ्गीकारात् । न चैवमपि–भगवते गां ददाति, अत्मानं समर्पयतीत्यादिव्यवहारानुपपत्तिरिति–वाच्यम्; तत्र स्वत्वप्रकारतानिरूपितविशेष्यत्वरूपफलावच्छिन्नस्वस्वत्वध्वंसा-नुकूलव्यापारस्यैव ददात्यर्थत्वात् भगवन्निरूपितस्वत्वस्य सर्वत्र सिद्धत्वे-ऽपि सर्वेषां तज्ज्ञानाभावेन तत्प्रकारकज्ञानीयविशेष्यतायाः फलत्वा-विरोधात्। अत एव भगवति सर्वोत्कर्षस्य सिद्धत्वेऽपि भगवान् जय-त्वित्यादिप्रयोगः । उत्कर्षनिष्ठप्रकारतानिरूपितविशेष्यताया एव तत्र जिधात्वर्थतया तस्या असिद्धत्वेन लोडर्थेच्छाविषयत्वस्य तत्रा-न्वयाबाधात् । न च–सर्वकर्मसमाराध्यत्वं भगवतो न सम्भवति अन्येषामेवान्यभक्ताराध्यत्वादिति–वाच्यम्;

"येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयाऽन्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥"

इत्यादिभिरन्यदेवताभक्ताराध्यत्वस्यापि भगवत्यभिधानात् ॥ तत्र गौरवितप्रीतिहेतुव्यापाररूपयजिधात्वर्थतावच्छेदकप्रीतिरूपफले द्विती-यान्तार्थमद्वृत्तित्वान्वयात् क्षणध्वंसिक्रियायाः कालान्तरभाविस्व-र्गादिजनकत्वासम्भवेन द्वारस्य वक्तव्यत्वे अत्यन्तापरिदृष्टापूर्वस्य द्वारत्वापेक्षया 'स एवैनं भूतिं गमयति', 'तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति' इत्यादिश्रुत्युक्तदेवताप्रसादस्यैव द्वारताया युक्तत्वेन निरुक्तसर्वफलप्रदत्वं भगवत उपपन्नम् । न च–तत्रेन्द्रादिप्रीतेरेव द्वारत्वं श्रूयते न भगवत्प्रीतेरिति–वाच्यम्; आराधितेन्द्रादिनाशे कल्पान्तरे फलोत्पादानुपपत्त्या तत्रेन्द्रादिपदस्य तदन्तर्यामिपरत्वा-वश्यकत्वात् । उपपादितं चेदं फलमतउपपत्तेरित्यत्र भाष्ये । निरुक्तसर्वाधारत्वं च 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृ-थिव्यौ विधृतौ तिष्ठतः' इत्यादिश्रुतिसिद्धम् । 'पाथसि पीते तृष्णा

शाम्यति' इत्यादाविव सतिसप्तम्या नन्यजनकभावलाभात् जगदुपादानत्वमपि तल्लक्षणम् । भाव्यवस्थाविशेषवतः प्रागवस्थायोगित्वमुपादानत्वम् । स्वावच्छेदककालानवच्छिन्नत्व-स्वपूर्वत्वस्वसामानाधिकरण्यैतत्त्रितयसम्बन्धेन तद्धर्मविशिष्टधर्मवत्त्वं तद्धर्मावच्छिन्नं प्रत्युपादानत्वमिति फलितम् । मृत्पिण्डे निरुक्तसम्बन्धत्रयेण घटत्वावस्थाविशिष्टपिण्डत्वावस्थासत्त्वाद्घटत्वावच्छिन्नं प्रति पिण्डत्वावच्छिन्नस्योपादानत्वोपपत्तिः ; घटत्वावच्छिन्नं प्रति द्रव्यत्वावच्छिन्नस्योपादानतावारणाय प्रथमसम्बन्धनिवेशः, घटत्वावस्थाध्वंसविशिष्टस्यापि तदवच्छिन्नं प्रत्युपादानत्ववारणाय स्वपूर्वत्वनिवेशः । घटाव्यवहितपूर्वतन्त्वादेस्तदुपादानतावारणाय सामानाधिकरण्यनिवेशः । अन्यथासिद्धिनिरूपकतानवच्छेदकत्वस्यापि निवेशाच्च न घटत्वावस्थापूर्वकालीनवायुसंयोगादिविशिष्टस्य तदवच्छिन्नं प्रत्युपादानत्वापत्तिः । न चैवं—द्रव्यत्वाद्यवच्छिन्नस्य घटत्वाद्यवच्छिन्नं प्रत्यन्यथासिद्धत्वादेव वारणे प्रथमसम्बन्धनिवेशवैयर्थ्यमिति—वाच्यम् । अन्यथासिद्धत्वस्यैकस्याभावेन अन्यथासिद्धिनिरूपकतावच्छेदकत्वेन प्रामाणिकानां व्यवहारविषया ये ये धर्मास्तत्तद्व्यक्तित्वावच्छिन्नभेदकूटवत्त्वस्य निवेश्यतया विशेषणान्तरावार्याणामेव भेदकूटनिवेशेन वारणाङ्गीकारात् । सामानाधिकरण्यशरीरे च स्वाश्रयापृथक्सिद्धिसम्बन्धावच्छिन्ना स्वापृथक्सिद्धिसम्बन्धावच्छिन्ना चाधिकरणता अपृथक्सिद्धिसम्बन्धावच्छिन्नाधिकरणतात्वेन प्रवेश्या । 'बालोऽपि यः प्रजानाति तं देवाः स्थविरं विदुः,' 'काठिन्यवान्यो बिभर्ति' इत्यादिभिः स्वाश्रयापृथक्सिद्धेरपि वृत्तिनियामकत्वस्य सिद्धत्वात्तदवच्छिन्नाधिकरणताप्रसिद्धेः ॥ एवं च—सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मणः स्थूलचिदचिद्विशिष्टं स्वं प्रत्युपादानत्वमुपपन्नम् ॥ उक्तसम्बन्धत्रयेण स्थूलत्वविशिष्टसूक्ष्मत्वस्य तत्र सत्त्वात्, तादात्म्येन स्थूल-

विशिष्टं प्रति तेन सम्बन्धेन सूक्ष्मविशिष्टब्रह्मणः कारणत्वात्, तादात्म्यसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणताश्रयत्वं चोपादानलक्षणं बोध्यं; उपादानोपादेययोरभेदाच्च **तदनन्यत्वमारम्भणशब्दादिभ्य** इत्यधिकरणोपपत्तिः ॥

अथैवं—न विलक्षणत्वादस्य तथात्वं च शब्दादित्यादिना विलक्षणयोरुपादानोपादेयभावासम्भवमाशङ्क्य, **दृश्यते**त्वित्यादिना तत्सम्भवसिद्धान्तकरणं नोपपद्यते, अभिन्नयोरेवोपादानोपादेयभावे केनापि रूपेण वैलक्षण्याप्रसक्तेः—**इति चेन्न** । विशिष्टयोरुपादानोपादेयभावाङ्गीकारेऽपि विशेषणांशयोरिव विशेषणांशं प्रति विशेष्यांशस्याप्युपादानताया अभिमतत्वात्तन्निर्वाहायाविलक्षणयोरप्युपादानोपादेयभावस्य व्यवस्थापनीयत्वात्, अवस्थां प्रति द्रव्यस्योपादानतानिर्वाहायोपादानत्वलक्षणस्य तादात्म्यापृथक्सिद्ध्यन्यतरसम्बन्धावच्छिन्नकार्यतावटितस्य परिष्कर्तव्यतया विशेषणांशनिष्ठापृथक्सिद्धिसम्बन्धावच्छिन्नकार्यतानिरूपितकारणत्वस्य विशेष्यांशे सत्त्वेन तत्रोपादानत्वव्यवस्थापनस्यावश्यकत्वात्, अन्यथोपादानत्वलक्षणातिव्याप्तेर्दुर्वारत्वात्। अत एव विशेषणांशं प्रति विशेष्यांशस्योपादानत्वपरा यतोवेत्यादिश्रुतिरुपपन्ना; तत्र भूतानीत्यस्य तच्छरीरकपरमात्मपरत्वे बहुवचनस्य प्रत्यक्षविषयार्थकेदमर्थान्वयस्य 'यत्प्रयन्त्यभिसंविशन्ति' इत्यस्य च अस्दारस्यापत्तेः। कचिद्विशिष्टं प्रति विशिष्टस्योपादानत्वमुच्यते—यथा 'सदेव सोम्येदमग्र आसीत्', 'आकाशाद्वायुः'—इत्यादौ, तत्राकाशशरीरकाद्वायुशरीरक उत्पन्न इत्यर्थात्। **तदभिध्यानादेव तु तल्लिङ्गात्सः**—इत्यनेनाकाशादिशब्दस्य विशिष्टपरताप्रतिपादनात् पञ्चम्यन्ताकाशादिपदानां विशिष्टपरत्वे प्रथमान्तानामपि तेषां तत्परत्वावश्यकत्वात्। छान्दोग्यश्रुतौ 'तत्तेज ऐक्षत', 'ता आप ऐक्षन्त' इत्यादीक्षणरूपलिङ्गात्तेजोऽप्शब्दयोर्विशिष्टपरत्वा-

वश्यकतया तदनुरोधेन 'अग्नेरापः, अद्भ्यः पृथिवी' इत्यत्र–अप्पद-पर्यन्तं विशिष्टपरतायास्स्वीकारेऽपि पृथिवीपदस्य विशेषणमात्रपरत्व-मेव। ततश्च 'पृथिव्या ओषधयः, ओषधीभ्योऽन्नं, अन्नात्पुरुषः' इति च विशेषणानामेवोपादानोपादेयभावपरम् । अत एवानन्दमयाधिकरणे 'स वा एष पुरुषोऽन्नरसमयः' इत्यत्र पुरुषपदस्य शरीरपरतया व्याख्या-नं सङ्गच्छते; अन्यथा पुरुषपदस्यापि विशिष्टपरत्वे विकारार्थकमयट्-प्रत्ययानुपपत्तेः, उत्तरत्र 'तस्यैष एव शारीर आत्मा' इति प्रतिपादना-त्सर्वान्तरात्मत्वोपपादनायास्य प्रकरणस्य प्रवृत्तत्वेन तद्विरोधापत्तेश्च। विशेषणांशं प्रति विशेष्यांशस्योपादानत्वाभिप्रायेणैव श्रुतिप्रक्रियायां 'यत्र हि द्वैतमिव भवति' इत्यादिश्रुत्यर्थविचारे भाष्यम्—

"कृत्स्नस्य जगतो ब्रह्मकार्यतया तदन्तर्यामिकतया च
तदात्मकत्वेनैक्यात्तत्प्रत्यनीकनानात्वं प्रतिषिध्यते ॥"

—इति ॥

अत्र जगत इति विशेषणमात्रपरं, विशिष्टपरत्वे तदन्तर्यामिकतये-त्यत्रान्वयानुपपत्तेः ॥ न च–जगत इत्यस्य विशिष्टपरत्वेऽपि तदन्त-र्यामिकतयेत्यस्य विशेषणांशेऽन्वयाद्विशेषणमात्रपरस्य जगत इति पदान्तरस्याध्याहारेण तत्रान्वयसम्भवाद्वा नानुपपत्तिरिति–वाच्यम्; अस्य वाक्यस्य विशिष्टोपादानतापरत्वे ब्रह्मकार्यतयेत्यत्र ब्रह्मपदस्य सूक्ष्मविशिष्टपरत्वावश्यकत्वेन तदन्तर्यामिकतयेति तच्छब्देन विशिष्ट-परामर्शे बाधात्, स्थितिदशायां सूक्ष्मावस्थानाशेन सूक्ष्मशरीर-कस्यान्तर्यामित्वासम्भवात्, विशिष्टस्य प्रक्रान्ततास्थले विशेष्यमात्रस्य तच्छब्देन परामर्शायोगात्; अन्यथा तत्त्वमसीत्यादौ परमते लक्षणा-भिधानासाङ्गत्यापत्तेः । न च–सन्मूला इत्यत्र सच्छब्दस्य विशिष्ट-परत्वेऽपि सदायतना इत्यत्र सच्छब्दस्य श्रुतप्रकाशिकोक्तरीत्या विशेष्यमात्रपरत्वात् विशिष्टस्य प्रक्रान्तत्वेऽप्यैतदात्म्यमित्यत्र विशेष्य-

मात्रस्यैतच्छब्देन परामर्शवत्प्रकृतेऽपि विशेष्यमात्रस्य तच्छब्देन परामर्शस्सम्भवतीति-वाच्यम् ; क्लिष्टकल्पनापत्तेः ॥

यदि च—सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्यत्र विशिष्टोपादानत्वतात्पर्यानुरोधेन ब्रह्मपदस्य विशिष्टपरत्वे तत्पदस्यापि विशिष्टपरत्वं वाच्यम् ; तच्च न सम्भवति; विशिष्टस्य जननेऽन्वय-सम्भवेऽप्यननपदार्थस्थितावन्वयासम्भवात्, सकृदुच्चरित इति न्यायविरोधेनैकस्य तच्छब्दस्योभयबोधकत्वासम्भवात् । अतो ब्रह्म-पदस्य तत्पदस्य च विशेष्यपरत्वमेव वक्तव्यम्; विशिष्टस्य कारणत्वे विशेष्यस्यापि तदनपायेन जननेऽपि तदन्वयाविरोधात् । तथा च प्रकृतेऽपि तादृशश्रुत्यनुसारेण ब्रह्मपदस्य तच्छब्दस्य च विशेष्य-परत्वान्नानुपपत्तिरिति **विभाव्यते ; तदाऽपि**-विशेषणांशं प्रति-विशेष्यस्योपादानत्वपरतयाऽपि तद्भाष्यस्य व्यासार्यैर्व्याख्यातत्वात्तद-पि भाष्यटीकोभयाभिमतम् ॥

तत्रेयं टीका—

"यद्वा-कृत्स्नस्य जगत इति निष्कर्षकशब्दः, ब्रह्मशब्दो विशेष्यमात्रपरः, ब्रह्मकार्यतया तदन्तर्यामिकतया च जगत्त-दात्मकं ; तदात्मकत्वं नाम जगतस्तत्प्रकारैकस्वभावतया प्रागवस्थानाभावात्तदन्तर्गतत्वं तेन प्रकारेणैक्यं, न तु स्वरू-पैक्यं ; विशिष्टान्तर्भाव ऐक्यमित्यर्थः ॥" —इति ॥

'दृश्यते तु' इति सूत्रे भावप्रकाशिका च—

"**अत्र केचित्**—कारणकोटौ विशेष्यभूतस्य ब्रह्मणः कार्यकोटौ विशेषणभूतेष्वचेतनेष्वप्युपादानत्वमुपपादनीयम्, अन्यथा तस्य सर्वो-पादानत्वासिद्धेः । अत एव श्रुतप्रकाशिकायां 'यद्वा जगत इति निष्कर्षकशब्दः, ब्रह्मशब्दो विशेष्यमात्रपरः' इत्यादिना कार्यकोटौ विशेषणभूतस्य जगतः कारणकोटौ विशेष्यभूतं ब्रह्म प्रत्युपादेयत्व-

शरीरत्वे सतः–इत्याचार्यैः प्रतिपादितम् । ततश्च सालक्षण्याभावादुपादानत्वं न सम्भवतीत्याक्षेपस्य अचेतनांशे चेतनत्वानुवृत्तिरस्तीति परिहारासम्भवादेतत्सूत्रोक्तन्यायेन विलक्षणयोरप्युपादानोपादेयभावोऽस्तीत्येवं परिहर्तव्यम्—इति वदन्ति ॥" —इति ॥

तथा च–**न विलक्षणत्वादित्यादिकं** विशेषणविशेष्ययोरुपादानोपादेयभावपरं, आरम्भणाधिकरणं च–विशिष्टयोरुपादानोपादेयभावपरम् ; **चमसवदविशेषादिति** च–विशेषणांशयोरेवोपादानोपादेयभावपरमिति न परस्परं विरोधः; चमसवदित्यत्र "विकारजननीमज्ञामष्टरूपामजां ध्रुवाम्" इत्यादिश्रुत्यनुरोधेन ब्रह्मशरीरभूताया अजाया उपादानत्वस्योक्तत्वात् ॥

नन्वेवं–'ईक्षतेर्नाशब्दं' 'आकाशस्तल्लिङ्गात्' इत्याद्यधिकरणानुत्थितिः ; विशेषणभूतप्रकृत्याकाशादीनामेवोपादानत्वपरतया 'सदेव सोम्येदमग्र आसीत्' 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' इत्यादिश्रुतेरुपपत्तेस्सदाकाशादिपदानां ब्रह्मपरताव्यवस्थापनस्यानावश्यकत्वात् ; सच्छब्दस्य परमात्मशरीरभूतप्रधानपरत्वाङ्गीकारेण तत्र विशेष्ये ईक्षणाद्यन्वयासम्भवेऽपि विशेषणे तदन्वयसम्भवात् ; ब्रह्मपरतापक्षेऽपि विशेषणद्वारैव परिणामस्य वक्तव्यत्वात् ॥ न च–सदादिपदस्य **परमात्मशरीरभूतप्रधानपरत्वे** लक्षणा स्यादिति–वाच्यम्; सूक्ष्मचिदचिद्विशिष्टब्रह्मपरत्वेऽपि लक्षणाया अवर्जनीयत्वात्, शतदूषण्यां सच्छब्दस्य विशिष्टपरत्वे लक्षणा दोष इत्याशङ्क्य ; सर्वशब्दलक्षणापक्षादस्यैवोपादेयतमत्वाभिधानात् । एवं चाकाशादेवेत्यत्र न रूढित्यागोऽपि , तद्वाक्ये ईक्षणादेरश्रवणेन परमात्मशरीरत्वेन बोधनावश्यकत्वात् , ब्रह्मपरतापक्षे रूढित्यागस्य दुस्त्यजत्वात् , अर्थविरोधेन अपशूद्राधिकरणमूत्रोक्तं शूद्रशब्दरूढित्यागमुपजीव्यात्रापि रूढिं विहाय आसमन्तात्काशत इत्यादियोगा-

र्थस्य भाष्येऽङ्गीकारात्। यद्यप्याकाशाधिकरणटीकायामाकाशशब्द-स्याकाशशरीरिकत्वपरत्वाङ्गीकारेण रूढ्यपरित्याग उक्तः। तथाऽपि वैश्वानराधिकरणटीकायामग्निपदस्य "शब्दादिभ्योऽन्तः प्रतिष्ठा-नाच्च नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते" "साक्षादप्यविरोधं जैमिनिः" इति सूत्रद्वयानुरोधेन अग्निशरीरक-परताया अग्रनयनरूपगुणविशिष्टपरतायाश्च स्वीकारे रूढ्यर्थ-योगार्थप्रकारकवैश्वानरविद्ययोर्भेदापत्तिरित्याशङ्क्य चिदचिदसाधारण-लिङ्गवत्सु वाक्येषु चिदचिद्वाचिपदानां तच्छरीरिकपरत्वं तादृश-लिङ्गरहितेषु च योगार्थपरत्वमिति व्यवस्थाकरणादाकाशवाक्ये तादृ-शलिङ्गाभावेन योगार्थस्यैव युक्तत्वेन आकाशाधिकरणोक्तरूढ्यप-रित्यागे व्यासार्थानां निर्भराभावात्। उक्तं च न्यायसिद्धाञ्जने—

"परविद्यासु जीवोक्तिर्निरुक्त्यादेः पराश्रया।
तल्लिङ्गानन्यथासिद्धौ तद्विशिष्टावलम्बिनी॥"

तथा च—आकाशादिपदानां योगेन ब्रह्मपरत्वव्यवस्थापनमफलम्—इति चेन्न॥ आदेशशब्दोदितप्रशासितृत्व-सत्यसङ्कल्पत्व-तेजःप्रभृति-स्रष्टृत्व—नामरूपव्याकर्तृत्वादीनां बहूनां विशेषणेऽन्वयाङ्गीकार-स्यायुक्ततेत्यभिप्रायेणेक्षत्यधिकरणस्य प्रवृत्तेः; सच्छब्दस्य प्रधान-परत्वे गतिसामान्यन्यायविरोधाच्च। एवमाकाशशब्दस्य रूढिस्वीकारे ज्यायस्त्वपरायणत्वादीनामन्वयानुपपत्तेः परमात्मातिरिक्तसिद्धाकाश-परतां स्वीकृत्य विशेषणे तदन्वयाङ्गीकारे च रूढित्यागस्यावर्ज-नीयत्वात् योगार्थपरत्वमेव युक्तं; अन्यथा सर्वकारणत्वानुपप-त्तेश्च। तथा च—विशेषणांशयोः परस्परमुपादानोपादेयभावेऽपि न विरोधगन्धः॥

ननु—सिद्धान्तेऽतिरिक्तावयव्यनभ्युपगमेन द्रव्यस्वरूपस्य नित्य-तयाऽवस्थानामेवोत्पत्तिमत्त्वेन अवस्थां प्रति तदाश्रयद्रव्यस्योपादानत्वं,

पूर्वावस्थायाश्चासमवायित्वमित्येतदुचितं; न तु पूर्वावस्थाविशिष्टद्रव्यस्योत्तरावस्थाविशिष्टद्रव्यं प्रत्युपादानत्वं; द्रव्यस्य नित्यतयोपादेयत्वासम्भवात्। तथा महत्त्वादिरूपावस्थाविशिष्टद्रव्यं प्रति प्रकृतित्वरूपावस्थाविशिष्टद्रव्यस्योपादानत्वासम्भवात् सुतरामुत्तरावस्थाविशिष्टद्रव्यशरीरकब्रह्म प्रति पूर्वावस्थाविशिष्टद्रव्यशरीरकब्रह्मण उपादानत्वं न सम्भवति—इति चेत्॥ मैवम्। सिद्धान्ते कालसंयुक्तत्वरूपकालसम्बन्धित्वस्य द्रव्यमात्रनिष्ठत्वेनावस्थासाधारण्याभावेनाद्रव्ये कालसम्बन्धित्वव्यवहारस्य गौणत्वादाद्यक्षणसम्बन्धरूपोत्पत्तेः पूर्वकालवृत्तित्वरूपकारणत्वस्य च द्रव्य एव सम्भवादुत्तरावस्थां प्रति पूर्वावस्थायाः कारणत्वमित्यस्यापि उत्तरावस्थाविशिष्टद्रव्यनिरूपितपूर्वावस्थाविशिष्टद्रव्यगतकारणतायामेव पर्यवसानात्। अद्रव्यस्यापि कालसम्बन्धित्वस्वीकारे पूर्वमसत्या एवावस्थाया उत्पत्तिस्वीकारापत्त्या असत्कार्यवादस्य दुर्वारत्वात्। स्ववृत्तिध्वंसप्रतियोगिक्षणावृत्तित्वस्ववृत्तित्वोभयसम्बन्धेन क्षणविशिष्टत्वं हि असत्कार्यवादविषयः; अवस्थायाः कालसम्बन्धित्वे च उक्तोभयसम्बन्धेन क्षणविशिष्टत्वस्यावस्थायामक्षतत्वात्तदापत्तिर्दुर्वारा। तथा च 'कथमसतस्सज्जायेत' इति श्रुतिविरोधः। असत इति षष्ठ्यन्तं, सदिति भावप्रधानं; पूर्वं कालासम्बन्धिनः कालसम्बन्धित्वं न सम्भवतीत्युक्तासत्कार्यवादनिरासोऽभिप्रेतः। आद्यक्षणसम्बन्धरूपोत्पत्तिशरीरे च घटत्वाद्यवच्छिन्ननिरूपिताधिकरणतैव निवेश्या; तेन द्रव्यस्वरूपस्य नित्यतया स्वाधिकरणक्षणध्वंसानधिकरणक्षणाप्रसिद्ध्या स्वपदेन द्रव्योपादानासम्भवेऽपि न क्षतिः। स्वसमभिव्याहृतपदार्थतावच्छेदकधर्मावच्छिन्ननिरूपिताधिकरणतावत्क्षणध्वंसानधिकरणक्षणसम्बन्धस्यैवोत्पत्तिपदार्थत्वात्; घट उत्पद्यत इत्यादौ घटत्वावच्छिन्ननिरूपिताधिकरणतावत्क्षणध्वंसानधिकरणक्षणसम्बन्धी घट इति बोधात्॥

यद्यपि—स्वसमभिव्याहृतपदार्थतावच्छेदकेत्यनेन घटत्वादेरुपादानेऽपि तदवच्छिन्ननिरूपिताधिकरणतावत्क्षणध्वंसानधिकरणक्षणाप्रसिद्धिरस्त्येव; घटादेः प्रवाहानादितया सर्वस्यापि क्षणस्य यत्किञ्चिद्घटाधिकरणत्वेन तादृशक्षणध्वंसाधिकरणत्वात् । तथाऽपि—सिद्धान्ते घटत्वस्य प्रतिव्यक्तिभिन्नतया उत्पत्त्यन्वयितावच्छेदकं यद्घटत्वं तदवच्छिन्नाधिकरणक्षणस्य पूर्वमभावादेव प्रसिद्धिसम्भवः । अत्र यत्किञ्चिद्धर्ममनिवेश्य स्वसमभिव्याहृतपदार्थतावच्छेदकधर्मस्यैव विशिष्य निवेशाच्च आत्मा जायते सृज्जायत इत्यादिर्न व्यवहारः, आत्मत्वाद्यवच्छिन्नाधिकरणक्षणध्वंसानधिकरणक्षणाप्रसिद्धेः । एवं च—स्थूलसूक्ष्मशरीरकस्य ब्रह्मणः स्थूलत्वसूक्ष्मत्वाभ्यां कार्यकारणभावोपपत्तिः; स्थूलरूपस्य निरुक्तजनिघटकत्वसम्भवात् । तथा च तदनन्यत्वाधिकरणे भाष्यम्—

"संस्थानस्यासत उत्पत्तावसत्कार्यवादप्रसङ्ग इति चेदसत्कार्यवादिनोऽप्युत्पत्तेरनुत्पत्तिमत्त्वे सत्कार्यवादप्रसङ्गः, उत्पत्तिमत्त्वे चानवस्था; अस्माकं त्ववस्थानां पृथक्प्रतिपत्तिकार्ययोगानर्हत्वादवस्थावत एवोत्पत्त्यादिकं सर्वमिति निरवद्यम् ॥" —इति ॥

न च—उक्तरीत्या अवस्थायाः कालसम्बन्धित्वाभावेन पूर्वोत्तरावस्थद्रव्ययोरेवोपादानोपादेयभावसिद्धावपि तच्छरीरकब्रह्मणस्तदसिद्धितादवस्थ्यमिति—वाच्यम् ; एवमप्युपादानोपादेयशरीरतया ब्रह्मण उपादानोपादेयशब्दयोर्ब्रह्मणि मुख्यत्वोपपत्तेः । अत एव शतदूषण्यां—विशिष्टस्योपादानत्वे प्राप्ताप्राप्तविवेकेन विशेषणयोरेवोपादानोपादेयभावपर्यवसानमित्याशङ्क्य, विशेष्यस्याप्युपादानादिशब्दवाच्यत्वप्रतिक्षेपस्त्वशक्य इति समाहितम् ॥ न च—अवस्थाया उत्पत्तिमत्त्वानङ्गीकारे उपादानलक्षणे अपृथक्सिद्धिसम्बन्धावच्छिन्नकार्यता-

निवेशनस्य व्यर्थतया ब्रह्मणो विशेषणांशं प्रति कारणत्वाभावेन 'न विलक्षणत्वात्' इत्यधिकरणस्यानुत्थितिरिति—वाच्यम्; यतो वेत्यादिश्रुत्युक्ताया विशेषणांशनिरूपितकारणताया निर्वाहार्थमेवापृथक्सिद्धिसम्बन्धावच्छिन्नकार्यतानिवेशावश्यकतयोक्ताधिकरणसङ्गतेः ॥

इदं तु बोध्यम् ॥ सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मणः स्थूलचिदचिद्विशिष्टं प्रति कारणत्वं नास्तीत्यस्य कोऽर्थः? स्थूलचिदचिद्विशिष्टस्य कार्यत्वाभावात्तन्निरूपितोपादानत्वं सूक्ष्मचिदचिद्विशिष्टस्य न सम्भवतीति ; अथवा तस्य कार्यत्वेऽपि तं प्रत्येतस्योपादानत्वमप्रामाणिकमिति?

आद्येऽपि—स्थूलचिदचिद्विशिष्टस्य निषेध्यभूतं कार्यत्वमुत्पत्तिमत्त्वरूपं वा, प्रागभावप्रतियोगित्वरूपं वा? नाद्यः। विशिष्टाधिकरणतावटितोत्पत्तिमत्त्वस्य पूर्वमेवोपपादनात्। न च—स्ववृत्तिध्वंसप्रतियोगिक्षणावृत्तित्वरूपस्वपूर्वक्षणावृत्तित्वस्ववृत्तित्वोभयसम्बन्धेन क्षणविशिष्टत्वरूपोत्पत्तिमत्त्वमेव कार्यताप्रयोजकं, तच्च न स्थूलविशिष्टब्रह्मणि विशेष्यीभूतब्रह्मणः पूर्वक्षणवृत्तित्वेन विशिष्टे तस्मिन् तदभावासम्भवादिति—वाच्यम्; शुद्धवह्नित्वावच्छिन्नाभावप्रतियोगितावच्छेदकताया महानसीयत्वविशिष्टवह्नित्वापर्याप्तत्ववच्छुद्धब्रह्मपर्याप्ताधेयतायास्स्थूलविशिष्टापर्याप्ततया पूर्वक्षणनिरूपितवृत्तितायाः पर्याप्तिसम्बन्धावच्छिन्नाभावस्य तत्र सम्भवेन निरुक्तोत्पत्तिमत्त्वसम्भवात्॥ न द्वितीयः। घटत्वावस्था भविष्यति, घटो भविष्यतीति द्विविधव्यवहारनिर्वाहाय एकस्यैव प्रागभावस्य घटत्वावस्थापर्याप्ता तद्विशिष्टपर्याप्ता च प्रतियोगिता द्विविधा स्वीक्रियते। तथा स्थूलावस्था भविष्यति, स्थूलशरीरकं ब्रह्म भविष्यतीति द्विविधव्यवहारनिर्वाहाय प्रागभावनिरूपितप्रतियोगिताद्वयस्वीकारस्यावश्यकत्वात्, इच्छाविषयत्वस्य प्रागभावप्रतियोगित्वव्याप्यतया बहुस्यामितीच्छानुरोधेन बहुशरीरकब्रह्मणस्तदावश्यकत्वाच्च ॥

नापि द्वितीयकल्पो युक्तः। स्थूलविशिष्टस्य कार्यत्वे तादात्म्येन तत्सम्बन्धिनि पूर्वकालावच्छेदेन तादात्म्येन सम्बन्धित्वरूपोपादानत्वस्य सूक्ष्मविशिष्टे ब्रह्मणि सर्वसिद्धत्वेन तस्य कैरप्यपलपितुमशक्यत्वात्॥ न च–तादात्म्येन कार्याधिकरणनिरूपितपूर्वकालावच्छिन्नतादात्म्यावच्छिन्नसम्बन्धितामात्रं नोपादानतारूपं, किं त्वनन्यथासिद्धत्वघटितं; तथा च स्थूलविशिष्टं प्रति सूक्ष्मविशिष्टस्यान्यथासिद्धत्वान्नोपादानत्वं, अन्यथा स्थूलविशिष्टाकाशादिकं प्रति सूक्ष्मविशिष्टस्य तस्योपादानताप्रसङ्गादिति–वाच्यम्; अन्यथासिद्धत्वस्यानुगतानतिप्रसक्तस्यैकस्य दुर्वचत्वेन यत्र यत्र प्रामाणिकानां न कारणत्वव्यवहारस्तत्तद्भेदकूटवत्त्वस्यैवानन्यथासिद्धत्वरूपतया 'यतो वा इमानि भूतानि जायन्ते' 'यद्भूतयोनिं परिपश्यन्ति धीराः' 'सदेव सोम्येदमग्र आसीत्' इत्यादिश्रुतिभिस्सूक्ष्मविशिष्टब्रह्मणः स्थूलविशिष्टं प्रति कारणत्वस्यैव व्यवहृतत्वेन तद्भेदस्योपादानताशरीरे अनिवेशात्, आकाशादेश्च तादृशव्यवहाराभावेन अन्यथासिद्धताया एव युक्तत्वात्तद्भेदस्योपादानतागर्भे प्रवेश्यत्वात्। एतेनावस्थानां कालसम्बन्धित्वस्य कार्यकारणभावस्य च सत्त्वेऽपि न क्षतिः, अवस्थानां कार्यकारणभावेऽपि तद्विशिष्टयोरपि तथात्वस्य दुरपह्नवत्वात्। ब्रह्मण उपादानत्वे निर्विकारत्वश्रुतिविरोधपरिहारः प्रागेव प्रतिपादितः। निरुक्तोपादानत्वं च "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" इत्यधिकरणे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञादिभिस्सूत्रकारैरेव स्थापितम्। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा च 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं स्यात्' 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्' इति श्रुतिसिद्धा॥ श्रुतेश्चायमर्थः–'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातं भवति' इति मैत्रायणीयश्रुत्यनुसारादुपादानप्रकरणानुगुण्याच्च श्रुतेन मतेन विज्ञातेनेत्यध्याहारात्, येन श्रुते-

नाश्रुतं श्रुतं भवति, येन मतेनामतं मतं भवति, येन विज्ञातेनाविज्ञातं विज्ञातं भवतीत्यर्थः। श्रुतेन येनेति तृतीयार्थोऽभेदः श्रुतपदार्थे शाब्दबोधविशेषविषयेऽन्वेति; उक्तश्रुत्यनुरोधादेवेदं सर्वमित्यप्यध्याहार्यम्; परिदृश्यमानस्थूलचिदचिच्छरीरकमिति तदर्थः। अश्रुतमित्यस्य स्थूलरूपावच्छिन्नशाब्दबोधीयविषयताशून्यमित्यर्थः। तस्य सर्वपदार्थेऽन्वयात् स्थूलावस्थावच्छिन्नशाब्दज्ञानीयविषयताशून्याभिन्नं प्रत्यक्षविषयस्थूलचिदचिच्छरीरकं ब्रह्म शाब्दबोधीयविषयताविशिष्टजगन्निमित्ताभिन्नसूक्ष्मचिदचिद्वैशिष्ट्यावच्छिन्नशाब्दबोधीयविषयताश्रयो भवतीति वाक्यार्थः। अश्रुतं श्रुतमित्यस्य स्थूलशरीरकत्वेनाश्रुतं सूक्ष्मशरीरकत्वेन श्रुतमित्यर्थात्। पूर्वमश्रुतमिदानीं श्रुतमिति तु नार्थः; विशिष्टवैशिष्ट्यावगाहिबोधे विधेये उद्देश्यतावच्छेदकसमानकालीनत्वभाननियमस्य तिलकी कर्म कुर्वीतेत्यादाविवौत्सर्गिकत्वेन तद्बाधापत्तेः। तादृशनियमभङ्गभयादेव हि 'वर्षे जपन्निदं स्तोत्रमपुत्रः पुत्रवान् भवेत्' इत्यादावपुत्रपदं पुत्रविरोधिपुत्रेच्छापरं, नञः असुर इत्यादाविव विरोध्यर्थकत्वात्, सति पुत्रे तदिच्छाया असम्भवेन तद्विरोधित्वोपपत्तेः। एवं च स्थूलसूक्ष्मचिदचिद्विशिष्टब्रह्मरूपकार्यकारणयोरभेदलाभात् 'उत तमादेशमप्राक्ष्यः' इत्यादेशपदेन कारणत्वघटितनिमित्तत्वलाभेन कार्याभिन्नत्वे सति कारणत्वरूपमुपादानत्वमुक्तं भवति। न च—उक्तप्रतिज्ञाया अभेदमात्रलाभार्थत्वे येन सर्वमिदं भवतीत्यनेनैव कार्यकारणयोरभेदलाभात् अश्रुतं श्रुतमित्यादीनां वैयर्थ्यमिति—वाच्यम्; कार्याभिन्नत्वे सति कारणत्वरूपोपादानत्वस्य तावन्मात्रेण बोधनेऽपि सूक्ष्मचिदचिद्रूपकारणतावच्छेदकावच्छिन्नविषयतानवच्छेदकत्वरूपकारणतावच्छेदकभेदस्य कार्यतावच्छेदके बोधनायाश्रुतमित्यादीनां सार्थकत्वात्। तद्बोधश्च कार्यकारणयोरत्यन्ताभेदे कारकव्यापारवैयर्थ्यमिति नैयायिकाशङ्कापरिहाराय; कारणताव-

च्छेदककार्यतावच्छेदकयोरुक्तपारिभाषिकभेदबोधने च कार्यतावच्छेदकविशिष्टस्य पूर्वमभावे तन्निष्पत्तये कारकव्यापारसार्थक्यमिति समाधानसूचनात् । तयोर्वास्तवभेदस्तु श्रुत्या बोधयितुमशक्यः, सूक्ष्मस्थूलचिदचिद्रूपयोस्तयोरवस्थाभेदेऽपि स्वरूपैक्येन भेदाभावात्, आत्मनि खल्वर इत्यादिमैत्रायणीयश्रुतावपि सप्तम्याः दाने कर्णसम इत्यादाविवाभेदार्थकत्वात्पूर्वोक्तार्थ एव पर्यवसानम् । एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातमित्यादिभाष्यस्याप्येकपदस्य सूक्ष्मचिदचिच्छरीरकब्रह्मपरतया, सर्वपदस्य स्थूलसर्वशरीरकपरतया, तृतीयाया अभेदार्थकतया च सूक्ष्मचिदचिच्छरीरकब्रह्मज्ञानाभिन्नस्थूलचिदचिच्छरीरकत्वोपलक्षितब्रह्मज्ञानं प्रतिज्ञातमित्यर्थः । तथा च स्वावच्छिन्नाभिन्नवृत्तित्वस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्व स्वावच्छिन्ननिरूपितकारणतावच्छेदकत्वैतत्त्रितयसम्बन्धेन धर्मविशिष्टधर्मवत्त्वं एकविज्ञानेन सर्वविज्ञानप्रतिज्ञार्थः । येनेत्यस्यादेशपदार्थनिमित्तकारणपरत्वेन कारणत्वस्यापि तदुटकत्वात् । मृत्पिण्डादिदृष्टान्ते उक्तत्रितयसम्बन्धेन घटत्वविशिष्टमृत्पिण्डत्वमादायोक्तप्रतिज्ञानिर्वाहः, दार्ष्टान्तिके चेयं प्रतिज्ञा स्थूलसर्वशरीरकत्वविशिष्टसूक्ष्मशरीरकत्वमादायोपपादनीया । सा च सर्वस्य कार्यत्वमन्तरा न निर्वहतीति वियदादेः कार्यत्वोपपादकतया **प्रतिज्ञाहानिरव्यतिरेकादित्याद**कमुपपन्नम् । वियदादेः कार्यत्वानङ्गीकारे प्रतिज्ञाया अनिर्वाहात् । न च–नित्यविभूत्यादीनां अकार्यत्वेऽपि प्रतिज्ञाया अहानिवदाकाशस्याप्यकार्यत्वेऽपि प्रतिज्ञाया अहानिः प्रसज्यत इति–वाच्यम्; येनाश्रुतं श्रुतमित्यादावश्रुतादिशब्दानां नित्यविभूत्यादिव्यतिरिक्तपरत्वादुत्तरत्र सदेव सोम्येदमग्र आसीदितीदंकारगोचरस्यैव जगतस्सन्मात्रतापत्तिप्रतिपादनात् ॥

एवं–स्वज्ञानातिरिक्तसर्वद्रव्यशरीरकत्वमपि तल्लक्षणं, शरीरपद-प्रवृत्तिनिमित्तभूतं तल्लक्षणं च; तन्निष्ठज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगित्वं तं प्रति शरीरित्वम्। एतज्जीवस्येदं शरीरमित्यादौ ज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगित्वावच्छिन्नं शरीरपदार्थः; तदेकदेशज्ञानावच्छिन्नानुयोगितायां षष्ठ्यन्तार्थस्यैतज्जीववृत्तित्वस्यान्वयात् ज्ञानावच्छिन्नैतज्जीवनिष्ठानुयोगिताकापृथक्सिद्धि निरूपितद्रव्यत्वसमानाधिकरणप्रतियोगित्वावच्छिन्नमिदमिति बोधः॥ यस्यात्मा शरीरं, यस्य पृथिवी शरीरमित्यादावपि बोध ऊह्यः। ईश्वरस्य तज्ज्ञानं शरीरं, चैत्रस्य तज्ज्ञानं शरीरमित्यादिव्यवहारवारणायानुयोगितायां ज्ञानावच्छिन्नत्वस्य, परिमाणमेतस्य शरीरमित्यादिव्यवहारवारणाय प्रतियोगित्वे द्रव्यत्वसामानाधिकरण्यस्य प्रवेशः। श्रीभाष्योक्तलक्षणत्रयफलितमिदमेव शरीरपदप्रवृत्तिनिमित्तं, यथाश्रुते लक्षणत्रयस्य प्रवृत्तिनिमित्तत्वे शरीरशब्दस्य शक्तित्रयापत्त्या नानार्थकत्वापत्तेः, अन्यतमस्य प्रवृत्तिनिमित्तत्वे चाधेयत्वविधेयत्वशेषत्वानि शरीरशब्दप्रवृत्तिनिमित्तानीति भाष्यविरोधात्॥ उक्तं च **न्यायसिद्धाञ्जने**—

> "अत्रेदं चतुर्थमपि भाष्यकाराभिप्रेतं लक्षणमुच्यते। यस्य चेतनस्य यदवस्थमपृथक्सिद्धविशेषणं द्रव्यं तत्तस्य शरीरमित्याधेयत्वविधेयत्वशेषत्वान्यपृथक्सिद्धेरेव अवान्तरभेदा इह विवक्षिताः॥"
>
> —इति॥

तथा च–स्वज्ञानातिरिक्तद्रव्यत्वव्यापकप्रतियोगिताकापृथक्सिद्धिसम्बन्धनिरूपितज्ञानावच्छिन्नानुयोगिताश्रयत्वं लक्षणं फलितं, सर्वशरीरकत्वादेव तत्तद्वाचिपदेन ब्रह्मणस्सामानाधिकरण्योपपत्त्या 'सर्वं खल्विदं ब्रह्म', 'सदेव सोम्येदमग्र आसीत्', 'तत्त्वमसि' इत्यादि-

सामानाधिकरण्यनिर्वाहः। शरीरवाचिशब्दानां शरीरिणि शक्तेर्भाष्यादिसिद्धत्वात् ॥

अत्र वदन्ति—

सर्वं खल्विदं ब्रह्मेत्यादौ सर्वपदस्य तच्छरीरकत्वावच्छिन्ने शक्त्यङ्गीकारापेक्षया सर्वपदार्थस्य ब्रह्मण्यपृथक्सिद्धिसम्बन्धेनान्वयाङ्गीकार एव युक्तः ; अभेदापृथक्सिद्ध्यन्यतरसम्बन्धावच्छिन्नप्रकारताकबोधजनकत्वस्यैव सामानाधिकरण्यरूपतया अपृथक्सिद्धिसम्बन्धेनान्वयेऽपि सामानाधिकरण्यनिर्वाहात्। एवं च नीलादिपदानां गुणमात्रवाचकत्वेऽपि न क्षतिः, अपृथक्सिद्धिसम्बन्धमादायैव नीलो घट इत्यादिसामानाधिकरण्योपपत्तेः। एवं तत्त्वमसीत्यत्र त्वंपदस्य श्वेतकेतुमात्रपरत्वेऽपि न क्षतिः ; तत्पदार्थस्य ब्रह्मणस्तत्रापृथक्सिद्धिसम्बन्धेनान्वयसम्भवात्, सर्वं खल्विदं ब्रह्मेत्यत्र सर्वपदस्य तच्छरीरकपरमात्मपरत्वे इदंपदार्थस्य प्रत्यक्षविषयस्य तदेकदेशे सर्वस्मिन्नन्वयस्य वक्तव्यत्वेन व्युत्पत्तिविरोधात्। संयोगावच्छिन्नक्रियारूपगमनपदार्थैकदेशसंयोगे गुणाभेदान्वयतात्पर्येण गमनं गुण इत्यादिव्यवहारवारणायाभेदसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति पदजन्योपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वात्। एवं तत्त्वमसीत्यादौ त्वंपदस्य श्वेतकेतुशरीरकपरमात्मपरत्वे श्वेतकेतुपदस्य श्वेतकेतुमात्रपरत्वे सम्बोधनस्थलसिद्धस्य युष्मच्छब्दसम्बोध्यवाचकपदयोस्समानार्थकत्वनियमस्य व्याघातः। न च—चैत्र त्वत्पितेत्यादौ युष्मच्छब्दस्य सम्बन्धिनि लाक्षणिकत्वेन तत्र व्यभिचारात्तादृशनियम एवासिद्ध इति—वाच्यम् ; समासस्थले तादृशनियमाभावेऽपि व्यासस्थले तादृशनियमे बाधकविरहात्। तत्र सम्बोध्यवाचकश्वेतकेतुपदस्यापि तच्छरीरकपरमात्मपरत्वे प्रकृतवाक्यजन्यशाब्दबोधाश्रयत्वेनेच्छाविषयरूपविभक्त्यर्थस्य प्रकृत्यर्थे परमात्मन्यन्वयो न सम्भवति ;

वक्तुरुद्दालकस्य सर्वज्ञं परमात्मानं प्रति बुबोधयिषाविरहात्, भगवांस्त्वमेव तद्ब्रवीत्विति प्रष्टारं श्वेतकेतुं प्रत्येव बुबोधयिषोत्पत्तेः। परमात्मन एव प्रष्टृत्वे प्रश्नं प्रति जिज्ञासायास्तां प्रति चाज्ञानस्य कारणतया परमात्मनोऽज्ञत्वमवर्जनीयं स्यात्। श्वेतकेतुपदस्य तच्छरीरकपरमात्मपरत्वे तदेकदेशश्वेतकेतौ विभक्त्यर्थान्वयस्तु न सम्भवति, विभक्त्यर्थसम्बोध्यत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति प्रकृतिजन्योपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वात्। अन्यथा पुत्रीं प्रति त्वत्पतिस्सुन्दर इति वक्तव्ये जामातस्त्वं सुन्दरोऽसीतिवाक्यप्रयोगापत्तेः; पुत्रीपतिरूपजामातृपदार्थैकदेशपुत्र्यां तदन्वयसम्भवात्। एवं प्रतर्दनविद्यायां 'त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान् यतीन् सालावृकेभ्यः प्रायच्छम्' इत्यारभ्य, 'प्राणोऽस्मि प्रज्ञात्मा, तं मामायुरमृतमित्युपास्व' इत्यस्यास्मच्छब्दार्थेन्द्रजीवविशेष्यकापृथक्सिद्धिसम्बन्धावच्छिन्नप्राणपदार्थपरमात्मप्रकारताकोपासनस्य विधानपरत्वाङ्गीकारान्नानुपपत्तिः; अन्यथा मामित्यस्य तच्छरीरकपरमात्मपरत्वे त्वाष्ट्रमहनमित्यादावध्याहृतस्याहंपदस्य जीवपरत्वावश्यकतया वैरूप्यापत्तेः। शरीरवाचकानां शरीरिपर्यन्तत्वमित्यादिभाष्यस्य शरीरिविशेष्यकबोधजनकत्वमित्यर्थाङ्गीकारात् शरीरशरीरिभावरूपापृथक्सिद्धेस्संसर्गत्वेऽपि न विरोधः ; अन्विताभिधानपक्षे भाष्यकृतां निर्भरस्य वक्ष्यमाणत्वेन संसर्गांशेऽपि शक्तिरस्तीत्यभिप्रायाद्वा ॥

—इति ॥

वस्तुतस्तु—इतरपदार्थाभेदान्वयबोधे विभक्त्यसम्बोध्यत्वादिबोधे च मुख्यविशेष्यतासम्बन्धेन पदजन्योपस्थितेर्हेतुत्वमित्यत्रापृथक्सिद्धिसम्बन्धातिरिक्तसम्बन्धावच्छिन्नप्रकारताभिन्नत्वस्य मुख्यत्वरूपत्वात्सर्वं खल्विदं ब्रह्मेत्यादौ सर्वपदस्य तच्छरीरकपरत्वेऽपि इदंपदार्थस्य तदेकदेशे तत्त्वमसि श्वेतकेताविवित्यत्र त्वंपदस्य विशिष्टपरत्वेऽपि

तदेकदेशे सम्बोध्यत्वस्य चान्वयो न विरुद्धः । एवं–राज्ञःपुरुष इत्यादौ यथा स्वत्वस्य संसर्गत्वापेक्षया षष्ठ्यास्तत्र शक्तिस्वीकारे लाघवं, यथा च जानातीत्यादावाश्रयत्वस्य संसर्गत्वापेक्षया आख्यातार्थतापक्षे लाघवं, तथाऽत्राप्यपृथक्सिद्धेस्संसर्गत्वापेक्षया प्रकारत्वे लाघवं सम्भवतीति शरीरवाचकानां शरीरिणि शक्तिरेव युक्तेति **गुरुसामानाधिकरण्यवादे प्रपञ्चितम्** ॥

इत्यनन्तार्यकृतौ सिद्धान्तसिद्धाञ्जने

ईश्वरपरिच्छेदस्तृतीयः ॥

अथ नित्यविभूतिर्निरूप्यते ॥

रजोरहितत्वे सति तमोरहितत्वे सति वा सत्त्ववत्त्वं, स्वयंप्रकाशत्वे सति सत्त्ववत्त्वं वा, चेतनधर्मभूतज्ञानान्यत्वे सति स्वयं प्रकाशत्वं, धर्मभूतज्ञानान्यत्वे सति पराक्त्वं वा **तल्लक्षणम्** । लक्षणत्रयेऽपि प्रकृतिवारणाय सत्यन्तं, जीवादिवारणाय विशेष्यम्; चतुर्थलक्षणे जीवेश्वरधर्मभूतज्ञानवारणाय सत्यन्तं, कालवारणाय विशेष्यम्। व्यावृत्तिः पञ्चमेऽप्यूह्या। **न्यायसिद्धाञ्जने** तु–निश्शेषाविद्यानिवृत्तिदेशविजातीयान्यत्वमपि तल्लक्षणमुक्तम्। निश्शेषाविद्याध्वंसोत्पत्तिं प्रत्याधेयतासम्बन्धेनावच्छेदकीभूतो यो देशस्तदवृत्तिद्रव्यविभाजकोपाधिमद्भिन्नत्वे सति द्रव्यत्वं नित्यविभूतिलक्षणमिति तदर्थः। न च–तादृशदेशवृत्तिद्रव्यविभाजकोपाधिमत्त्वमेव लक्षणं युक्तं, द्रव्यविभाजकोपाधिनिवेशाच्च न भगवद्विग्रहादावव्याप्तिरित्यभावद्वयनिवेशो व्यर्थ इति–वाच्यम्। तदवृत्तिद्रव्यविभाजकोपाधिशून्यत्वघटितलक्षणे तद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वस्यानिविष्टत्वेन वैयर्थ्या-

भावात्, प्रकृतित्वकालत्वाद्युपाधिपञ्चकविषयकमेकं ज्ञानं तद्व्यक्तित्वेन निवेश्य तादृशज्ञानव्यक्त्यवाच्छिन्नावच्छेदकताकभेदनिवेशवैयर्थ्य-शङ्काया एवाप्रसक्तेश्च । न च–रजोरहितत्वं तमोरहितत्वं च नित्य-विभूतावसिद्धमिति तद्घटितलक्षणयोरव्याप्तिरिति–वाच्यम् ; 'आदित्य-वर्णं तमसः परस्तात्', 'ते ह नाकं महिमानस्सचन्ते', 'क्षयन्तम-स्य रजसः पराके' इत्यादिभिस्तयोस्सिद्धेः ; तमस इत्यस्य तमो-गुणविशिष्टपरतया परस्तादित्यस्य भिन्नदेशवृत्तित्वपरतया आदित्य-वर्णे भगवद्विग्रहे तमोगुणवद्भिन्नवृत्तित्वबोधनेन तदधिकरणीभूतनित्य-विभूतेस्तमोगुणवद्भिन्नत्वस्यावश्यकत्वात्। न च–ब्रह्मस्वरूपस्य तमो-गुणवद्भिन्नत्वपरा उक्तश्रुतिः, आदित्यवर्णमित्यस्य स्वप्रकाशमित्यर्था-दिति–वाच्यम्; तथा सत्यादित्यवर्णमित्यस्यास्वारस्यापत्तेः, अस्ताति-प्रत्ययस्य वृत्तित्वपरतया तादृशगुणवद्भिन्नत्वमात्रबोधासम्भवाच्च ॥

यद्यपि—"दिक्शब्देभ्यस्सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्व-स्तातिः" इत्यस्तातिप्रत्ययस्य प्रथमान्तादपि विधानसत्त्वान्निरर्थकत्व-मावश्यकमेव। पुरस्ताद्वसतिः पुरस्तादागतः पुरस्ताद्रमणीय इति तदुदा-हरणात्, 'स एवाधस्तात्स उपरिष्टात्स पश्चात्सपुरस्तात्स दक्षिणतस्स उत्तरतस्स एवेदं सर्वम्' इति **भूमविद्यायां** स एवेदं सर्वमित्युप-संहारानुरोधेन स एवाधस्तादित्यादेरधोदेशस्स एवेत्यर्थाङ्गीकारावश्य-कत्वात्। तथा च प्रकृतेऽपि तमसः परत्वं ब्रह्मण एव बुध्यते। **तथाऽपि**–अधश्शब्दस्यार्थान्तरेऽनुशासनप्रयोगयोस्सत्त्वेऽप्यर्थान्तरा-पेक्षया आनन्तर्यरूपार्थे स्वारस्यवदस्तातिप्रत्ययान्तस्य किञ्चिद्देश-वृत्तित्वपरत्व एव स्वारस्यात्, गवादिशब्दस्यानेकार्थत्वेऽपि बाधक-विरहे सान्नावद्व्यक्तेः परित्यागादर्शनात्तमसः परस्तादित्यस्य तद्देश-वृत्तित्वपरत्वमेव युक्तम्। एवं क्षयन्तमस्येत्यादेः रजोगुणवद्भिन्नदेशे वसन्तमित्यर्थः। न च–जापकोपाख्याने मुक्तप्राप्यस्थानस्य 'द्वाभ्यां

मुक्तं, त्रिभिर्मुक्तम्' इति गुणत्रयविरहबोधनात्तत्र सत्त्ववत्त्वमपि न सम्भवतीति–वाच्यम् ;

"शुद्धसत्त्वमयं दिव्यमक्षरं ब्रह्मणः पदम् ।
अथातो ब्रह्मणो लोकः शुद्धसत्त्वसनातनः ॥"—

इत्यादि **पाद्मपुराण**वचनैस्तादृशलोके सत्त्वसिद्धौ उक्तवचनस्य त्रित्वावच्छिन्नावच्छेदकताकभेदपरतया घटवति घटपटोभयत्वावच्छिन्नावच्छेदकताकभेदवदविरोधात्, 'स्वसत्ताभासकं सत्त्वं गुणसत्त्वाद्विलक्षणम्' इति प्रधानगतसत्त्वस्य विजातीयत्वेन तद्भेदस्याबाधाच्च ॥

यत्तु—'तदक्षरे परमे व्योमन्' इत्यक्षरशब्दप्रयोगात्, 'आदित्यवर्णं तमसः परस्तात्' इति तमःपरत्वोक्त्या चाव्यक्ततमसोरन्तरालेऽधीतः प्रकृतिपरिणामविशेष एव मुक्तानामीश्वरस्य च भोगस्थानतया आम्नायते ; शुद्धसत्त्वव्यपदेशस्य च रजस्तमसोरभिभूततयोपपत्तेरतिरिक्ताप्राकृतस्थानकल्पने गौरवात् । तत्रापि पृथिव्यादिभेदाभ्युपगमेन प्राकृतत्वज्ञानाच्च, अन्यथा तत्त्वसङ्ख्याधिक्यप्रसङ्गात् ; 'तं षड्विंशकमित्याहुस्सप्तविंशमथापरे' इति श्रुत्या कालस्यान्तर्भावानन्तर्भावाभिप्रायेण षड्विंशत्वसप्तविंशत्वयोः प्रतिपादनेन नित्यविभूतेरतिरिक्तत्वे तादृशश्रुतिविरोधात्। एवं 'सदेव सोम्येदमग्र आसीत्', 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्', 'नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यत्' इत्यादि श्रुतिविरोधश्च ; तत्रैकपदस्य समानकालीनविभिन्नव्यवहारजनकजन्यधर्माभावरूपनामरूपविभागाभावपरत्वात्, स्वाप्रयोज्यव्यवहारप्रयोजकत्वकालिकविशेषणत्वैतदुभयसम्बन्धेन जन्यधर्मविशिष्टजन्यधर्माभावस्यैकपदनिष्कृष्टार्थत्वात् । महत्त्वादिविशिष्टप्रकृतिगतसततपरिणामरूपाविशदावस्थामादायासम्भववारणाय कालिकसम्बन्धनिवेशः ; चित्त्वाचित्त्वा दि

वारणाय जन्यत्वनिवेशः; अभावश्च स्वाश्रयापृथक्सिद्धिसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः, तेन सम्बन्धान्तरावच्छिन्नतादृशधर्माभावस्येदानीमपि सत्त्वेऽपि न क्षतिः, 'नित्यविभूतेरतिरिक्तद्रव्यात्मिकायास्तद्दशायामपि सत्त्वे च तद्गतानन्तधर्माणामुक्तसम्बन्धेन प्रलयकालेऽपि ब्रह्मणि सत्त्वेनैकत्वव्याघातात्। लीलाविभूत्यपेक्षयानित्यविभूतेस्त्रिगुणत्वेन तत्सत्तादशायां लीलाविभूत्यभावादेकत्वव्यवहारसमर्थनस्य मन्दत्वात्। वियदादेरेकैकस्याकार्यत्वे प्रतिज्ञाहानिमुद्भावयतां सूत्रकृतां तादृशानेकतत्त्वात्मिकाया अतिरिक्ताया नित्यविभूतेस्सत्त्वे तत्र प्रतिज्ञाहानेरवारणस्यानुचितत्वात्। एवं–'एतस्मादात्मनस्सर्वे लोकास्सर्वे देवास्सर्वाणि भूतानि व्युच्चरन्ति' इति श्रुतेस्सर्वलोकोत्पत्तिप्रतिपादिकाया विरोधश्च। तस्मात्प्रकृतेरक्षरत्वावस्थापन्नाया एव नित्यविभूतिरूपेण परिणामः; 'तदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्' इत्यादावव्यक्तशब्दोऽपि तद्धेतुभूताक्षरपर एव, तमसः परस्तादित्युक्तेरतो न विरोधः—**इति यादवप्रकाशमतम्॥**

तन्न–'अपुनर्भवाय कोशं भिनत्ति', 'कोशं भित्वा शीर्षकपालं भिनत्ति' इत्युपक्रम्य, 'पृथिवी भिनत्त्यापो भिन्नत्त्यव्यक्तमक्षरं भिनत्ति मृत्युं भिनत्ति' इति **सुबाल**श्रुत्या ब्रह्माण्डतदावरणाद्बहिर्भूतस्य तल्लोकस्य अक्षरभेदनानन्तरं प्राप्यत्वेनाभिहितस्याक्षरात्मकत्वासम्भवात्, शीर्षकपालं भिनत्तीत्यभिधाय पृथिव्यादिभेदनस्याभिहितत्वेन शरीरानुप्रविष्टानामेव पृथिव्यादीनामव्यक्ताक्षरतमसां च भेदनं तत्राभिधीयते; नावरणरूपाणामिति वक्तुमशक्यत्वात्। **पाद्मपुराणोत्तरखण्डे**—

"त्रिपाद्व्याप्तिः परं धाम पादोऽस्येहाभवात्पुनः।
त्रिपाद्विभूतिर्नित्या स्यादनित्यं पादमैश्वरम्॥
नित्यं तद्रूपमीशस्य परं धाम्नि स्थितं शिवम्।
अमृतं शाश्वतं दिव्यं सदा यौवनमास्थितम्॥"—

इत्यारभ्य, सप्तावरणावेष्टिताण्डकटाहादिवृत्तान्तं प्रकृत्यादिस्वरूपं च विस्तरशोऽभिधाय;

"प्रधानपरमव्योम्नोरन्तरे विरजा नदी ।
वेदाङ्गस्वेदजनिततोयैर्विस्राविता नदी ॥
तस्याः पारे परव्योम्नि त्रिपाद्भूतिस्सनातनी ।
अमृतं शाश्वतं नित्यमनन्तं परमं पदम् ॥
शुद्धसत्त्वमयं दिव्यमक्षरं ब्रह्मणः पदम् ।
अनेककोटिसाहस्रान्निवर्चं ध्रुवमव्ययम् ॥
सर्ववेदमयं शुभ्रं सर्गप्रलयवर्जितम् ॥"—

इत्यादिना वैकुण्ठलोकस्य नित्यत्वप्रकृत्युत्तीर्णत्वयोरभिधानेन तस्य प्रकृतिपरिणामत्वासम्भवात्। 'एको ह वै नारायण आसीन्न ब्रह्मा नेशानः' इति श्रुत्या, 'पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतम्' इत्यादौ च प्रलये भगवद्देहस्य साक्षात् स्थित्युक्त्या नित्यविग्रहावश्यकत्वेन तद्गताकुञ्चनप्रसारणादिजन्यधर्मद्वयमादाय निरुक्तैकत्वानुपपत्तिवारणाय शुद्धसत्त्ववृत्तिविभिन्नव्यवहारजनकानेकधर्माभावस्यैवैकत्वरूपत्वावश्यकतया एकमेवेत्यादिश्रुतेरविरोधात्, बहुस्यामित्युत्तरवाक्यगतबहुत्वविरोध्येकत्वस्यैव तत्र विवक्षितत्वात्, नित्यविभूतौ बहुत्वस्य सर्वदा सिद्धत्वेन इच्छाविषयत्वासम्भवेन प्रकृतिगतबहुत्वस्यैवेच्छाविषयताया वक्तव्यत्वेनैकत्वस्यापि तत्प्रतिकोटिभूतस्य प्रकृतिगतधर्ममादायैव वक्तुमुचितत्वात् ॥ न च–नित्यविभूतिमादाय बहुशरीरकत्वस्य सर्वदा सत्त्वे इच्छाविषयत्वानुपपत्त्या तदशायां तदपि नास्तीति निश्चीयत इति–वाच्यम्; तेजोऽप्सृष्ट्यनन्तरमपि 'बह्वयः स्याम प्रजायेमहि' इति सङ्कल्पस्य श्रुतिसिद्धत्वेन लक्ष्यमाणगतबहुत्वस्यैवेच्छाविषयताया आवश्यकत्वेन नित्यविभूतिसत्त्वेऽप्यविरोधात्। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अपि न विरोधः, यथा सोम्यैकेन मृ-

त्पिण्डेनेति दृष्टान्ते सर्वं मृण्मयमित्यनेन यथैकमृत्पिण्डकार्याणामेव ग्रहणं, तथा ब्रह्मकार्याणामेव तत्र ग्रहणेऽपि नित्यत्वेन सिद्धायाः नित्यविभूतेरग्रहणे तद्विरोधाप्रसक्त्या सूत्रकारैस्तच्छङ्कापरिहारयोरकरणोपपत्तेः ॥ **महाभारते**—

"अभयं चानिमित्तं च न च क्लेशभयावृतम् ।
द्वाभ्यां मुक्तं त्रिभिर्मुक्तमष्टाभिस्त्रिभिरेव च ॥
अप्रधर्षं महानन्दं विशोकं विगतक्लमम् ।
ईदृशं परमं स्थानं निराशास्ते च तादृशाः ॥
कालं स पचते तत्र न कालस्तत्र वै प्रभुः।"

आरण्यपर्वणि—

"योगसिद्धा महात्मानस्तमोमोहविवर्जिताः ।
तत्र गत्वा पुनर्नेमं लोकमायान्ति भारत ॥
स्थानमेतन्महाराज ध्रुवमक्षरमव्ययम् ॥"—

इत्यादिभिर्बहुधा नित्यविभूतेस्सूत्रकारैरेव प्रपञ्चितत्वेन तत्र तेषामनभ्युपगमस्य वक्तुमशक्यत्वात् ॥

अथैवं—नैयायिकमतनिरासावसरे "रूपादिमत्त्वाच्च विपर्ययो दर्शनात्", "उभयथा च दोषात्" इत्याभ्यां सूत्राभ्यां परमाणूनां रूपादिमत्त्वे अनित्यत्वप्रसङ्गस्य तदभावे च द्व्यणुकादौ कारणगुणपूर्वकगुणानुत्पत्त्या जगतो नीरूपत्वापादनरूपदूषणस्य च अभिधानासङ्गतिः, नित्यविभूतेर्भगवद्विग्रहस्य च नित्यत्वाभ्युपगमे रूपस्यानित्यत्वव्याप्यताभङ्गात्। एवं–"प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे" इति सूत्रस्य चासङ्गतिः; तत्र ब्रह्मणः शिरःपक्षपुच्छाद्यवयवभेदघत्त्वे उपचयापचययोरापादनान्नित्यविग्रहसत्त्वे च तत्र शिरःपक्षादिसत्त्वेऽप्युपचयापचययोरभावेन सावयवत्वस्योपचयापचयव्याप्यत्वाभावेनोक्तापादनासम्भवात्—**इति चेन्न** ॥ स्वमते रूपादिमत्त्व-

स्यानित्यत्वव्याप्यताविरहेऽपि तन्मते तद्व्याप्यत्वाविघातेन तन्मतसिद्धार्थमादाय तन्मते दूषणाभिधानस्योपपत्तेः, "न च पर्यायादप्यविरोधो विकारादिभ्यः" इति सूत्रे आत्मनस्स्वमते सङ्कोचविकासरूपावस्थाविरहेऽपि जैनमतसिद्धार्थमादाय तन्मते दूषणाभिधानदर्शनात्; प्रियशिरस्त्वाद्यप्राप्तिरित्यत्र च न कालभेदेन वृद्धिह्रासपरावुपचयापचयशब्दौ, किं तु प्रकोष्ठाङ्गुल्योरिव कालभेदानपेक्षपीनत्वकृशत्वरूपोपचयापचयपराविति सावयवत्वस्य तादृशोपचयापचयव्याप्यत्वे व्यभिचारविरहाद्ब्रह्मणस्सावयवत्वे प्रदेशभेदेन स्थूलत्वकृशत्वयोरेवापादनस्याभिमतत्वात्, अस्थूलमनण्विति श्रुतिविरोधेन तत्रेष्टापत्त्यसम्भवात्। स्पष्टं चेदं टीकायां। तथा च—अप्राकृतलोकस्सूक्तकृदनुमत एव। अक्षरशब्दस्वारस्यादपि न तल्लोकस्य प्रकृतिपरिणामरूपत्वं; न क्षरतीत्यक्षरमिति योगार्थस्य नित्यविभूतौ सम्भवात्, लोकत्वरूपावस्थाविशिष्टस्यापि प्रलयादौ नाशाभावेन नाशप्रतियोगितापर्याप्तवचनधिकरणत्वस्य तादृशलोकत्वविशिष्टे सत्त्वेनाक्षरशब्दस्य तत्रैव स्वारस्यात्, "अक्षरमम्बरान्तधृतेः" इत्यत्र योगमादायैवाक्षरशब्दस्य ब्रह्मपरताव्यवस्थापनात्तद्वदिहापि सम्भवात्, परमे व्योमन्निति समभिव्याहारस्य प्रकृतिपरिणामपरत्वे बाधकस्य सत्त्वाच्च॥ न च नित्यविभूतेरतिरिक्तत्वे सप्तविंशमथापर इत्युक्ततत्त्वसङ्ख्याविरोधः, नित्यविभूतेरनङ्गीकारेऽपि गुणक्रियादिकमादाय तत्त्वसङ्ख्याविरोधस्य जागरूकत्वात्, द्रव्याणामेव परिगणनमित्यङ्गीकारेऽपि धर्मभूतज्ञानस्य द्रव्यस्याधिकस्य सत्त्वेन तद्विरोधस्य दुष्परिहरत्वात्॥ न च—जीवस्य धर्मभूतज्ञानविशिष्टत्वेन तत्त्वपङ्क्तौ निवेशाद्विशेष्याणामेव परिगणनाद्धर्मभूतज्ञानस्य विशेषणत्वान्न सङ्ख्याविरोध इति—वाच्यम्; तथा सति नित्यविभूतेरपीश्वरविशेषणतयैव प्रवेशेन तद्विरोधाभावात्॥

सा च विभूतिर्ज्ञानानन्दात्मिका, 'ज्ञानानन्दमया लोकाः' इत्यादि प्रमाणात् । **रहस्याम्नाये** 'किमात्मिका भगवतो व्यक्तिः' इति भगवद्विग्रहस्य प्रकारे पृष्टे—'यदात्मको भगवांस्तदात्मिका व्यक्तिः'; 'किमात्मको भगवान्' 'ज्ञानात्मको भगवान् शक्त्यात्मको बलात्मक ऐश्वर्यात्मकः' इत्याद्युत्तरदर्शनेन दिव्यमङ्गलविग्रहरूपस्य शुद्धसत्त्व-द्रव्यस्य ज्ञानात्मकत्वसिद्धेश्च ॥

अत्र केचित्—उक्तरहस्याम्नायानुरोधाद्विग्रहस्य ज्ञानात्मकत्वस्वीकारे पाञ्चभौतिकरूपत्वमपि दुर्वारं; तस्मिन्नेव शास्त्रे सहपाठात्, इष्टापत्तौ च चेतनत्वप्रसङ्गात् । न च—तत्रापीष्टापत्तिरिति—वाच्यम्, जीवेश्वर-विकल्पबाधात्, पाञ्चभौतिकत्वस्यौपचारिकत्वे च ज्ञानात्मकत्वेऽपि तथात्वस्य दुर्वारत्वात् । अतस्त्रिगुणविभूतिरिव नित्यविभूतिरपि जडैव, निश्शेषाविद्यानिवृत्तिपूर्वकनिरवधिकज्ञानविकासस्थानतया ज्ञानत्वोपचार इति युक्तम् । विफलं च नित्यविभूतेस्स्वयंप्रकाशत्वकल्पनं, नित्यमुक्तेश्वराणां सर्वविषयकसाक्षात्कारसत्त्वेन तेषां तेनैव तद्भानात्, बद्धानां च शास्त्रादिजन्यपरोक्षज्ञानेन तद्भानात् ॥ न चैवं—जीव-स्वरूपस्यापि स्वप्रकाशत्वं न स्यात्, तस्यापि धर्मभूतज्ञानेनैव भानोपपत्तेरिति—वाच्यम्; सुषुप्तचवस्थायां धर्मभूतज्ञानविरहेऽप्यात्मनो भासमानतया स्वप्रकाशताया युक्तत्वेऽपि नित्यविभूतेः क्वापि ज्ञानान्तराविगमदशायां भानाभावेन तत्कल्पनस्यायुक्तत्वात् । एवं नित्यविभूतेरनन्तानां गोपुरमण्टपप्रासादादीनां ज्ञानपरिणामत्वाभ्युपगमे अल्पीयसां लीलाविभूतिस्थानां तेषां ज्ञानपरिणामत्वस्य कैमुतिक-न्यायेनाङ्गीकर्तुं शक्यतया योगाचारमतनिराकरणानुपपत्तिः; ततश्च तन्मतनिराकरणार्थं प्रवृत्तस्य यत्र ज्ञानत्वं तत्र स्वभिन्नार्थविषयकत्व-मिति व्याप्तिप्रतिपादनपरस्य "नाभाव उपलब्धेः" इति सूत्रस्य, यत्र स्वभिन्नार्थविषयकत्वाभावः तत्र ज्ञानत्वाभाव इति व्यतिरेकव्याप्ति-

प्रतिपादनपरस्य "न भावोऽनुपलब्धेः" इति सूत्रस्य चासङ्गतिः ; नित्यविभूतौ ज्ञानत्वसत्त्वेऽपि स्वभिन्नार्थविषयकत्वाभावेन व्याप्तिद्वयेऽपि व्यभिचारात्। जागरितप्रत्ययः स्वभिन्नार्थशून्यः, ज्ञानत्वात्, स्वाप्नज्ञानवत्—इत्यनुमाने बाधितत्वादिदोषजन्यत्वरूपोपाधिप्रतिपादनपरस्य "वैधर्म्माच्च न स्वप्नादिवत्" इत्यस्य चासङ्गतिः ; नित्यविभूत्यात्मकज्ञाने स्वभिन्नार्थशून्यत्वसत्त्वेऽपि बाधितत्वादेरभावेन साध्यव्यापकताभङ्गात्। एवं नित्यविभूतेरजडत्व एव प्रथमसूत्रटीकास्वारस्यम्। तथा च-**'संविन्नाम काचिन्निराश्रया निर्विषया वा अत्यन्तानुपलब्धेर्न सम्भवति'** इति भाष्यप्रतीकमुपादाय टीका—

"ननु कथं विषयाश्रयशून्यज्ञानाभावः, स्वरूपज्ञानं विषयाश्रयशून्यं त्वन्मते। उच्यते। स्थविष्ठमिदं चोद्यं, किं त्वया ज्ञातुरेव ज्ञानशब्दवाच्यस्याजडत्वनित्यत्वादिकं विषयाश्रयशून्यत्वं नित्यत्वादिकं च साध्यते, तत्सिद्धसाधनम्। यदि ज्ञातृव्यतिरिक्तस्य ज्ञानस्य, तर्हि ज्ञातृव्यतिरिक्तं विषयाश्रयरहितं ज्ञानं शून्यमिति ब्रूमः, ज्ञातृज्ञेयतदवच्छिन्नज्ञानस्वरूपव्यतिरिक्तं ज्ञानमनुपलम्भनिरस्तम्॥" —इति॥

तस्मान्नित्यविभूतिर्जडैव॥ —**इति वदन्ति॥**

परे तु—नित्यविभूतिरजडैव ; उक्तरहस्याम्नायाद्यनुरोधात्, शक्त्याद्यात्मकत्वादिवत् ज्ञानात्मकत्वस्य मुख्यत्वे बाधकविरहात्, 'स्वसत्ताभासकं सत्त्वं गुणसत्त्वाद्विलक्षणम्' इत्युपबृंहणानुरोधाच्च, उक्तरीत्या प्रमाणसिद्धे स्वप्रकाशत्वे तद्वैयर्थ्यस्याकिञ्चित्करत्वात्; अन्यथा धर्मभूतज्ञानेनैव सर्वकार्योत्पत्तावात्मकल्पनस्य व्यर्थतया तस्याप्यप्रसिद्धिप्रसङ्गात् ; आत्मनि व्यभिचारवारणाय प्रमाणजन्यज्ञानत्वं यत्र तत्र स्वभिन्नार्थविषयत्वमित्यादिव्याप्तिस्वीकारेण नित्य-

विभूतौ व्यभिचाराप्रसक्तया उक्तसूत्रविरोधविरहात्, प्रमाणतदाभासान्यतरजन्यज्ञानत्वविशिष्टसाध्यव्यापकत्वस्य बाधितत्वरूपोपाधौ सत्त्वेन वैधर्म्याच्चेत्यस्यापि न विरोधः ॥ —इत्याहुः ॥

सा च पञ्चोपनिषत्प्रतिपाद्यानि पञ्च महाभूतानि एकादशेन्द्रियाणीति षोडशतत्त्वात्मिका ॥ * * * *

इति

श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु
सिद्धान्तसिद्धाञ्जने
नित्यविभूतिपरिच्छेदो यावत्सम्पादितः ॥

॥ श्रीः ॥

L-1945

KARNATAKA S